वति। भवति चात्र। मदमूर्छाश्रमार्त्तानां वातविण्मूत्रसंगिनां। निद्राभिभूतभीतानां नृणां नासृक् प्रवर्त्तते। तद्दुष्ट
शोणितमनिर्ह्रियमाणं शोफदाहरागपाकवेदनाजनयेत्। अतिप्रवृत्तं व्यापारे दरस्पंदर्शयेत्। अल्पस्नातिस्विन्ना
तिविद्धैरज्ञैर्विश्रावितमतिप्रवर्त्तते। तदतिप्रवृत्तं शिरोभितापमांध्यमधीमंथं तिमिरप्रादुर्भावं धातुक्षयमाक्षेपकं
तृष्णादाहं पक्षाघातं एकांगविकारं हिक्कां श्वासं कासं पांडुरोगं मरणं चापादयति। तस्मान्न शीते नात्युष्णे नास्वि
न्ने नातितापिते। यवागूं प्रतिपीतस्य शोणितं मोक्षयेत् भिषक्॥ सम्यक् सृत्वा यदा रक्तं स्वयमेवावतिष्ठते। शुद्धं २४॥

नागेद्विधास्तु तासु तिरएमुखी गोवंदंते चेति। तास्तिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं वेदना कंडूर्मूर्छा ज्वरो दाहश्छ
र्द्दिर्मदः सदनमिति लिंगानि भवंति। तत्र महागदः। पानालेपनपंचसुजातिषु विषये एषा चिकित्सा क्रियते। मस्तके
रणादिषु उपयोज्यः। इंद्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः। अथ निर्विषाः कपिला पिंग
ला शंकुमूखी मूषिका पुंडरीकमुखी सांबरिका चेति। तत्र मनःशिलारंजिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धा मुद्गवर्णा
कपिला॥ किंचिद्रक्ता वृत्तकाया पिंगाशुगा च पिंगला। यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शंकुमुखी मूषिकाकृ
तिवर्णानिष्टगंधा च मूषिका। मुद्गवर्णा पुंडरीकतुल्यवक्त्रा पुंडरीकमुखी। स्निग्धा। पद्मपत्रवर्णाऽष्टादशांगुलप्रमा
णा सावरिका॥ सा च पश्वर्थे इत्यविषा व्याख्याताः। तासां यवनपांड्यादशसह्यपौतनादीनि क्षेत्राणि तेषु महाशरीरा
बलवत्यः शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवंति॥ तत्र सविषमत्स्यकीटदुर्दुरमूत्रपुरी०षकोथजाताः
कलुषेष्वंभःसु च सविषाः। पद्मोत्पलनलिनकुमुदसौगंधिककुवलयपुंडरीकशैवलकोथजाता विमलेष्वंभस्सु च
निर्विषाः। भवंति चात्र। क्षेत्रेषु विचरंत्येताः सलिलाढ्यसुगंधिषु॥ न च संकीर्णचारिण्यो न च पंकेशयाः सुखाः॥ ११॥

पाण्ड्य केरल देश दक्षिणाती स्यात ४
मलयो नर्मदा पारे पर्वत विशेष ४
पौतनो मथुरा देशः ४

तासांग्रहणमाद्रचर्म्मणा। अन्यैर्वाप्रयोगैर्गृह्णीयात्॥ अथैनानवेमहतिघटेसरस्तडागोदकपंकमावाप्यनिदध्या
त्॥ नकार्थेचासामुपहरेत्। शैवलंवल्लूरमोदकांश्चकंदाश्चूर्णीकृत्यनिदध्यात्। शय्यार्थंतृणमोदकानिपत्राणि
त्र्यहात्त्र्यहात्त्वाभ्योजलंभक्ष्यंदद्यात्। सप्तरात्राच्चघटमन्यंसंक्रामयेत्॥ भवंतिचात्र। स्थूलमध्याःपरिक्लिष्टाःपृ
थ्व्योमंदविचेष्टिताः। अग्राहिण्योल्पपायिन्यःसविषाश्चनपूजिताः॥७॥ अथजलौकावसेचकंसाध्यंव्याधितमुपवेश्यसंवेश्यवा
विरूक्ष्यतमवकाशंमृद्गोमयचूर्णैर्यद्यरुजंस्यात्॥ अथजलौकासोमुद्रकल्कसंयुतेनजलेनबहिःप्रक्षाल्यगृहीता
चताःसर्षपरजनीकल्कोदकप्रदिग्धगात्रीःसलिलसरकमध्येमुहूर्त्तंस्थिताविगतक्लमाश्चविगतमलाश्चज्ञात्वाता
भीरोगंग्राहयेत्। श्लक्ष्णशुक्लार्द्रपिचुप्रोतावच्छिन्नांवाकृत्वातासुखमपावृणुयात्। अगृह्णंत्योक्षीरंशोणितंबिंदुंवाद
द्यात्। शस्त्रपदानिवाकुर्वीतायदेवमपिनगृह्णीयात्तदान्यांग्राहयेत्। यदानिविशतेश्वखुरवदाननंकृत्वोन्नम्यच
दीर्घस्कंधंतदाजानीयात्। गृह्णातीति। गृह्णंतींचार्द्रवस्त्रावच्छन्नांधारयेत्॥ अथदंशेतोदंकंडूप्रादुर्भावैर्जानीयात्॥
शुद्धमियमादत्तइति॥ शुद्धमाददानामपनयेत्॥ अथशोणितगंधेननमुंचेत्॥ मुखमस्यास्तनतःसैंधवचूर्णेनावकिरेत्॥

जलजौकः १ श्रृ: ग्रहैः २

निस्सारतो ५ रुधिरनिस्सारेयोग्यः १

नारीसुकुमाराणामनुग्रहार्थं परं सुकुमारोयं शोणितावसेचनोपायोभिहितो यज्जलौकसः॥ तत्र वातपित्तकफ
दुष्टं शोणितं यथासंख्यं शृंगजलौकालाबुभिर्निर्हरीयात्। स्निग्धशीतरूक्षत्वात् सर्वाणि सर्वैर्वा विशेषतस्तु विश्राव्यं
शृंगालाबुभ्यां गृह्णीयात्। भवति चात्र। उष्णं समधुरं स्निग्धं गवां शृंगं प्रकीर्त्तितं। तस्माद्वातोपसृष्टे तु हितं तदवसेच
ने॥१॥ शीताधिवासा मधुरा जलौका वारिसंभवा। तस्मात् पित्तोपसृष्टे तु हिता सा त्ववसेचने॥२॥ अलाबु कटुकं रूक्षं ती
क्ष्णं च परिकीर्तितं। तस्मात् श्लेष्मोपसृष्टे तु हितं तदवसेचने॥३॥ अलाबु अष्टांगुलं हन्यात् शृंगं चेद्द्वादशांगुलं॥ जलौका
वहरेत्तु ये ध्रिशिराः सर्वगतेहरेत्॥४॥ तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन शृंगेण शोणितमवसेचयेत्॥ आचूषण
त्सांतर्दीपयालाबुना जलायुकावस्पेते। जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः॥ ता द्वादश
तासां सविषाः षट् तावत्य एव निर्विषाः॥ तत्र सविषाः। कृष्णा कर्बुरा अलगर्द्दा इंद्रायुधा सामुद्रिका गोचंदना चेति। तासां
जनचूर्णवर्णाः पृथुशिराः कृष्णा॥ वर्मिमत्स्यवदायताः। छिन्नोन्नतकुक्षिः कर्बुरा। रोमसा महापार्श्वा कृष्णमुखी अलगर्द्दा
इंद्रायुधवदूर्ध्वराजिभिश्चित्रिता इंद्रायुधाः। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधो

मस्तके स्तु ... अंकायमानो: २ जलजातत्र नामरितिमातो स्त्रु: ३ च है ४

ध्मेनगृह्णीतिः २ छिंकति १ ध्मनिक १

शेषेणाव चारयेत्॥ अत ऊर्ध्वं प्रवक्ष्यामि धूमोपहतलक्षणं। श्वसिति क्षौति चात्यर्थमाध्मायति कासते॥१॥ च
क्षुषः परिदाहश्च रागश्चैवोपजायते सधूमकं निश्वसति घ्रेयमन्यन्न वेत्ति च॥२॥ तथैव च रसान् श्रुस्तर्वान् श्रुतिश्चा
स्यापहन्यते तृष्णादाहज्वरयुतः सीदत्यथ च मूर्छति॥३॥ धूमोपहत इत्येवं वक्ष्ये तस्य चिकित्सितं। सर्पिरिक्षुर न त्रेवमन
संद्राक्षां पयो वा शर्करांबु वा॥४॥ मधुराम्लौ रसौ वापि वमनाय प्रदापयेत्। वमतः कोष्ठशुद्धिः स्यात् धूमगंधश्च निस्यति कारये
२१॥ ॥५॥ विधिनानेन शाम्यंति सदनक्षवथुज्वराः॥ दाहमूर्छातृडाध्मानश्वासकासश्च दारुणाः॥६॥ मधुरैर्लवणाम्लैश्च
कटुकैः कवलग्रहैः। सम्यग्गृह्णातींद्रियार्थान् मनश्चास्य प्रसीदति॥७॥ शिरोविरेचनं चास्मै दद्याद्योगेन शास्त्रवित्॥
दृष्टिर्विशुध्यते चास्य शिरो ग्रीवा च देहिनः॥८॥ अविदाहि लघु स्निग्धं आहारं चास्य कल्पयेत्॥ उष्णवातातपैर्दग्धे शीतः
कार्यो विधिः सदा॥९॥ शीतवर्षानिलैर्दग्धे स्निग्धं उष्णं प्रशस्यते तथातितेजसा दग्धे सिद्धिर्नास्ति कथंचनः॥१०॥ इंद्रव
ज्राग्निदग्धेपि जीवति प्रतिकारयेत्॥ स्नेहाभ्यंगपरीषेकैः प्रदेहैश्च तथा भिषक्॥११॥ ॥इति सूत्रस्थाने द्वाद
शोध्यायः॥ ॥१२॥ अथातो जलौकावचरणीयमध्यायं व्याख्यास्यामः॥ ॥नृपाढ्यबालस्थविरभीरुदुर्बल

अग्निप्रत... रक्तं... / ...कृतं...
...ह्येतत्पनं
शीतलं...पीतं ५

२० प्रसाधकं भवति॥भवति चात्र। अग्निनाकोपितं रक्तं भृशं जंतोः प्रकुप्यति॥ ततस्तेनैव वेगेन पित्तमस्याप्युदीर्य्यते॥१॥ तुल्य
वीर्य्ये उभे ह्येते रसतो वीर्य्यतस्तथा। तेनास्य वेदना तीव्रा प्रकृत्या च विदह्यते॥२॥ स्फोटाः शीघ्रं प्रजायंते ज्वरस्तृष्णा च व
र्द्धते। दग्धस्योपशमार्थाय चिकित्सां संप्रवक्ष्यते॥ प्लुष्टस्याग्निप्रतपनं कार्य्यमुष्णं तथौषधं। शरीरे स्विन्नभूयिष्ठे स्वि
न्नं भवति शोणितं॥४॥ प्रकृत्या ह्युदकं शीतं स्कंदयत्यतिशोणितं॥ तस्मात्सुखयति ह्युष्णं न तु शीतं कथंचन॥५॥
शीतामुष्णां च दुर्द्दग्धे क्रियां कुर्यात्भिषक्पुनः॥ घृतालेपनसेकांस्तु शीतानेवास्य कारयेत्॥६॥ सम्यग्दग्धे तु
माक्षीरैः प्लक्षचंदनगैरिकैः। सामृतैः सर्प्पिषा युक्तैः स्निग्धैरालेपं कारयेत् भिषक्॥७॥ ग्राम्यानूपौदकैश्चैनं पिष्टै
मांसैः प्रलेपयेत्। पित्तविद्रधिवच्चैव संततोष्माणमाचरेत्॥८॥ अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलां॥ क्रि
यां तु कुर्याद्भिषक् पश्चात् शालितंदुलकंडनैः॥९॥ तिंदुकीत्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत्। व्रणं गुडूचिपत्रैर्वा
च्छादयेदथवोदकैः॥१०॥ क्रियां कुर्यान्निखिलां भिषक् पित्तविसर्पवत्। मधूच्छिष्टं मधुकं रोध्रं सर्ज्जरसं तथा॥११॥
मंजिष्ठाचंदनं मूर्वां पिष्ट्वा सर्प्पिर्विपाचयेत्। सर्वेषामग्निदग्धानामेतद्रोपणमुत्तमं॥१२॥ स्नेहदग्धे क्रियां रूक्षां वि

घोरस्नेहस्य ? चूर्णादू लेपनं दग्धं २

पच्छेता। पत्रजं २


राछेदनादिषु नाडीषु शोणितातिप्रवृत्तिषु चाग्निकर्म्म कुर्यात्॥ तत्र रोगो हेति मावस्ये हाग्निकर्म्म चतुर्द्धेष्यते॥
तद्यथा। वलीयाईचेद्र बिंदुलेख्याप्रतिसारणानीनि दहनविशेषाः॥ भवंति चात्र। रोगस्य संस्थानमतो विदित्वा नर
स्य मर्म्माणि बलाबलं च। व्याधिं तथा तु च समीक्ष्य सम्यक् ततो व्यवस्येद्भिषगग्निकर्म्म॥ तत्र सम्यक् दग्धे मधुसर्प्पिर्भ्या
मभ्यंगः। अथैमानग्निना परिहरेत्। पित्तप्रकृतिमंतः शोणितं भिन्नकोष्ठमनुद्धृतशल्यं दुर्बलं बालं वृद्धं भीरुमने
कव्रणपीडितमस्वेद्यांश्चेति। इतऊर्द्धमितरथा दग्धलक्षणं वक्ष्यामः॥ तत्र स्निग्धं रूक्षं चाश्रित्य द्रव्यमग्निर्दहति। अग्नि
प्तिसंतप्तो हि स्नेहः सूक्ष्मशिरानुसारित्वात् त्वगादीननुप्रविश्याशु दहति॥ तस्मात्स्नेहदग्धे धिकारुजो भवंति
तत्र प्लुष्टं दुर्द्दग्धं सम्यग्दग्धं चेति। चतुर्विधमग्निदग्धं॥ तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत्प्लुष्टं। यत्रोत्तिष्ठेति त्वोषदाह
चोपाता वेदनाश्चिराश्चोपसाम्यंति॥ तद्दुर्दग्धं। सम्यग्दग्धमनवगाढं तालफलवर्णं सुसंस्थितं पूर्वलक्षणसंयु
क्तं च। अतिदग्धे त्वग्मांसावलंबनं गात्रविश्लेषः। शिरास्नायुसंध्यस्थिव्यापादनमतिमात्रं ज्वरदाहपिपासामूर्छाश्चोप
द्रवाः भवंति॥ अतिदग्धस्य चिरेण रोहति। रूढश्च विवर्णो भवति। तदेतच्चतुर्विधमग्निदग्धलक्षणमात्मकर्म्मप्रख्यापने

पान्न:राजीकालोहानिदुर्निमित्तै२ अग्नीनासाध्यं कुर्वीत २
पीतरोग अग्निकर्मैत ४ मामगत शाल्योद्धरणं थी ३
आत्ययिके आत्ययि यदि निरस्त हेत्यर्थ: ४

पुनरुत्पाते: मै तै २
अंस स्कतु २

र्म्ममध्यायं व्याख्यास्यामः ॥ ॥क्षाराद्ग्निर्गरीयान् क्रियासु व्याख्यातः ॥ तद्दग्धानां । रोगाणामपुनर्भावात् ॥
स्वेदजुभेषजशस्त्रक्षारैरसाध्यानां तत्साध्यत्वाच्च ॥ अथेमानिदहनोपकरणानि तद्यथा ॥ तत्र पिप्पल्यजाशकृद्गोदंतशर
शलाकाजांबवोष्टेतरलोहानि मांसगतानां क्षौद्रगुडस्नेहाश्च शिरास्नायुसंध्यस्थिगतानां । तत्राग्निकर्म्म सर्वर्तुषु कु
र्यादन्यत्र शरद्ग्रीष्माभ्यां । तत्राप्यात्ययिके अग्निकर्मसाध्ये व्याधौ तत्प्रत्यनीकं शीतं विधिं कृत्वा सर्वेषु ऋतुषु च पिच्छिलम
न्नं भुक्तवतः कर्म्म कुर्यीत ॥ मूढगर्भाश्मरीभगंदरार्शोमुखरोगेषु अभुक्तवतः कर्म्म कुर्वीत । तत्र द्विविधमग्निकर्म्माहुरेके
त्वग्दग्धं मांसदग्धं च इह तु शिरास्नायुसंध्यस्थिष्वपि न प्रतिषिद्धोग्निः । तत्र शब्दप्रादुर्भावो दुर्गंधता त्वक्संकोचश्च त्व
धूमसरव तो ४ ग्दग्धे कपोतवर्णताल्पश्वयथुवेदनता शुष्कसंकुचितव्रणता च मांसदग्धे कृष्णोन्नतव्रणता स्रावसंनिरोधश्च शिरा
स्नायुदग्धे रूक्षारुणता कर्कशस्थिरव्रणता च संध्यस्थिदग्धे तत्र शिरोरोगाधिमंथयोः भ्रूललाटशंखप्रदेशेषु दहे
त् । वर्त्मरोगे आर्द्रलक्तकप्रतिछन्नां दृष्टिं कृत्वा वर्त्मरोमकूपान् दहेत् ॥ त्वग्मांसशिरास्नायुसंध्यस्थिस्थिते अत्यु
ग्ररुजे वायावुच्छ्रितकठिनसुप्तमांसे व्रणे ग्रंथ्यर्शोर्बुदभगंदरापचीश्लीपदचर्म्मकीलतिलकालकांत्रवृद्धिसंधिशि

आग्रवक्त्र खजोनक २



चरवरास्नाव चक्रारा

आद्यग्निणो नेत्र रोगा: ७
अतोमर खीसद २

५

न्रसान्क्षारे सर्वानेवं विनाशयेत् । लवणस्य रसस्यापि कटुकोनुरसस्तथा ॥ ७ आम्लेन सह संयुक्तः स तीक्ष्णल
वणो रसः । माधुर्य्यं त्यजते त्यर्थं तीक्ष्णत्वं च विमुंचति ॥ माधुर्यात् शममाप्नोति वह्निरद्भिरिवाहुतः ॥ तत्र त्रिविधं स
म्यक् दग्धं । अतिदग्धं हि नदग्धं तत्र सम्यक्दग्धे विकारोपशमो लाघवमनास्रावश्च । हीनदग्धे तोददाहकंडूजाड्या
नि व्याधिवृद्धिश्च । अतिदग्धे दाहपाकरागस्रावांगमर्दक्लमपिपासामूर्छाः स्युर्मरणं वा ॥ क्षारदग्धव्रणं तु यथा दोषं
यथाव्याधि चोपक्रमेत ॥ अथ नैते क्षारस्य त्याज्यास्तद्यथा ॥ दुर्बलबालस्थविर भीरु सर्वांगशून उदरी रक्तपित्ति गर्भि
रू णी ऋतुमती प्रवृद्धज्वरउर ॥ प्रमेह रूक्ष क्षत क्षीण तृष्णामूर्छोपद्रुत क्लीबापवृत्तोद्वृत्तफलयोनयस्तथा मर्म शिरास्ना
युसंधितरुणास्थि सेवनी गलनाभिनखांतरशोफः स्रोतःस्वल्पमांसेषु च देशेष्वक्ष्णोश्च न दद्यादन्यत्र वर्त्मरोगा
त् ॥ तत्र क्षारसाध्येष्वपि व्याधिषु शूनगात्रमस्थिशूलिनमन्नद्वेषिणं हृदयसंधिपीडोपद्रुतं च क्षारो न साधयति ।
नवंति चात्र । विषाग्निशस्त्राशनिमृत्युकल्पः क्षारो भवत्यल्पमतिः प्रयुक्तः ॥ स त्वप्रमत्तेन सदा प्रयुक्तो रोगान्नि
हन्यादचिरेण घोरान् ॥ ॥ इति सुश्रुतसंहितायां सूत्रस्थाने एकादशोऽध्यायः ॥ ॥ अथातोऽग्निक
[illegible] दशमास्तौ कल्पय २

नादुर्खोपायस्पस्तिवपा। रक्तस्यदस्पामलकुन
माहि
स्निदनीसमपानीकरती श्रीसीतरल
पक्ताविपादकं नीकाय्यालैनर
दहनीत

यदेतद्विरुधिरस्यनिवारणं।संधानंस्कंदनंचैवपाचनंदहनंतथा॥३॥व्रणंकषायःसंधत्तेरक्तंस्कंदयतेहिमं॥तथा
संपाचयेत्भस्मदाहःसंकोचयेत्शिरा॥४॥अस्कंदमानेरुधिरेसंधानानिप्रयोजयेत्।संधानेभ्रस्यमानेतुपाचनैःस
मुपाचरेत्॥५॥कल्पैरेभिस्त्रिभिर्वैद्यःप्रयतेतयथाविधिं॥असिद्धिमस्तुचैतेषुदाहःपरमइष्यते॥६॥शोषदोषय
तोरक्तेनव्याधिरतिवर्त्तते॥सावशेषेततस्तेयनतुकुर्यादतिक्रमं॥७॥देहस्यरुधिरंमूलंरुधिरेणैवधार्यते।तस्मात्
यत्नेनसंरक्ष्यंरक्तंजीवइतिस्थितिः॥८॥स्रुतरक्तस्यसेकाद्यैःशीतैःप्रकुपितेऽनिले।शोफंसतोदंकोष्णेनसर्पिषा
परिषेचयेत्॥९॥ इतिसौश्रुतेआयुर्वेदशास्त्रेशोणितवर्णनीयोध्यायः॥१४॥ ॥अथातोदोषधातुमलक्षय
वृद्धिविज्ञानीयमध्यायंव्याख्यास्यामः॥ ॥दोषधातुमलमूलंहिशरीरं।तस्मादेतेषांलक्षणमुच्यमानमवधार
यतत्रप्रस्पंदनोद्वहनपूरणविवेकधारणलक्षणोवायुःपंचधाप्रविभक्तःशरीरंधारयति।रागपक्त्योजस्तेजो
मेधोष्मकृत्पित्तंपंचधाप्रविभक्तमग्निकर्मणानुग्रहंकरोति॥संधिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्यकृत्
श्लेष्मापंचधाप्रविभक्तउदककर्मणानुग्रहंकरोति॥रसस्तुष्टिंप्रीणनंरक्तपुष्टिंकरोति।रक्तंवर्णप्रसादंमांस २५॥

तद्विजानीयात् सम्यग्विस्राविते च तत् ॥२॥ लाघवं वेदनाशांतिर्व्याधेर्वेगपरिक्षयः ॥ सम्यक्विस्राविते लिंगं प्रसा
दो मनसस्तदा ॥३॥ त्वग्दोषा ग्रंथयः शोफा अन्ये शोणितजाश्च ये । रक्तमोक्षणशीलानां न भवंति कदाचन ॥४॥ अथ स्व
स्वप्रवर्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठाभद्रदारुविडंगचित्रकत्रिकटुकागारधूमहरिद्रार्कांकुरनक्तमालफलै
र्यथालाभं त्रिभिश्चतुर्भिः समस्तैर्वा चूर्णीकृतैर्लवणतैलप्रगाढैर्व्रणमुखमवघर्षयेदेवं सम्यक् प्रवर्तते ॥ अथातिप्रवृ
त्ते रोध्रमधुकप्रियंगुपतंगसगैरिकसर्जरसांजनशाल्मलीपुष्पशंखशुक्तियवगोधूमचूर्णैः शनैः शनैर्व्रणमु
खमवचूर्ण्यांगुल्यग्रेणावपीडयेत् ॥ सालसर्जार्जुनारिमेदमेषशृंगीधवधन्वनत्वग्भिर्वा चूर्णीकृताभिः क्षौमेण वा ध्मापि
तेन समुद्रफेनलाक्षाचूर्णैर्वा यथोक्तैर्व्रणबंधनद्रव्यैः गाढं बध्नीयात् ॥ शीताच्छादनभोजनागारैः शीतैः प्रदेहपरिषेकै
श्चोपचरेत् । क्षारेणाग्निना वा दहेत् । यथोक्तं व्यधनादनंतरं वा तामेवातिप्रवृत्तां शिरां विध्येत् । काकोल्यादिक्वाथं वा श
र्करामधुमधुरं पाययेत् । एणहरिणोरभ्रशशमहिषवराहाणां वा रुधिरं क्षीररसयूषरसैः सुस्निग्धैर्वाश्नीयादुप
द्रवांश्च यथास्वमुपाचरेत् । भवंति चात्र ॥ धातुक्षयात् स्रुते रक्ते मंदः संजायतेऽनलः ॥ पवनश्च परं कोपं याति तस्मात् प्रय
त्नतः ॥१॥ तं नातिशीतैर्लघुभिः स्निग्धैः शोणितवर्द्धनैः । ईषदम्लैरनम्लैर्वा भोजनैः समुपाचरेत् ॥२॥ चतुर्विधं

चप्राणायतनमुत्तमम्॥ देहस्यावयवस्तेन व्याप्तोभवतिदेहिनः। अभिघातात्क्षयात्कोपात्ध्यानात्शोकात्श्रमात्क्षुधः।
ओजः संक्षीयतेह्येभ्योधातुग्रहणविनिःसृतं॥ तेजः समीरितंतस्मात्विश्रंसयतिदेहिनः।तत्रविश्रंसोव्यापत्।क्षयेइति
लिंगानिभवंति।व्यापन्नस्यसंधिविश्लेषोगात्राणांसदनंदोषच्यवनं।क्रियासन्निरोधश्चविश्रंसेस्तब्धगुरुगात्रतावातशो
फोवर्णभेदोग्लानिस्तंद्रानिद्राचव्यापन्नेमूर्छामांसक्षयोमोहःप्रलापोमोहमितिचक्षीणेत्रयोदोषाबलस्योक्ताव्यापद्वि
श्रंसनक्षयाः।विश्लेषसादौगात्राणांदोषविश्रंसनश्रमः॥ अप्राचुर्यंक्रियाणांचमतंविश्रंसलक्षणं।गुरुत्वंस्तब्धतांगेषु
ग्लानिर्वर्णस्यभेदनं॥२॥ तंद्रानिद्रावातशोफोबलव्यापदिलक्षणं।मूर्छामांसक्षयोमोहःप्रलापोज्ञानमेवच॥३॥ पूर्वोक्ता
निचलिंगानिमरणंचबलक्षये। तत्रविश्रंसेव्यापन्नेचक्रियाविशेषैः॥ रविरुद्धैर्बलमाप्याययेत्। नष्टसंज्ञमितरंवर्ज
येत्।तेजोप्याग्नेयंक्रमराः पच्यमानानांधातूनामग्निर्निवृत्तंमुदरस्थंस्नेहजातंवसाख्यंस्त्रीणांविशेषतोभवेत्। ततमार्द
वसौकुमार्य्यमृदुस्वरोतेमातोत्साहदृष्टिस्थितिपक्तिकांतिदीप्तयोभवंति।तत्कषायतिक्तसीतगुरुरूक्षाविष्टंभवेगाघा
तव्यवायव्यायामव्याधिकर्शनैर्विक्रियते।तस्यापिपारुष्यवर्णभेदतोदनिःप्रभत्वानिविश्रंसनेभवंति॥कार्श्यमंदाग्नि

पित्तवृद्धौ पीतावभासता संतापः शीतकामित्वं अल्पनिद्रता मूर्छा बलहानिरिंद्रियदौर्बल्यं पीतविण्मूत्रनेत्रत्वं च। श्ले
ष्मवृद्धौ शौक्ल्यं स्थैर्यं गौरवमवसादस्तंद्रा निद्रा संध्यस्थिविश्लेषश्च। रसोऽतिवृद्धो हृदयोत्क्लेदं प्रसेकं चापादयति। रक्तं रक्तांगा
क्षितां सिरापूर्णत्वं च मांसं स्फिक्गंडौष्ठोपस्थोरुबाहुजंघासु वृद्धिं गुरुगात्रतां च॥ मेदः स्निग्धांगतामुदरपार्श्ववृद्धिं का
सश्वासादीन्दौर्गंध्यं च। अस्थ्यध्यस्थीन्यधिदंतांश्च। मज्जा सर्वांगनेत्रगौरवं। शुक्रं शुक्राश्मरीमतिप्रादुर्भावं च॥ पुरीषमा
टोपं कुक्षौ शूलं च। मूत्रं मुहुर्मुहुः प्रवृत्तिं बस्तितोदमाध्मानं चौंगनैजठराग्निवृद्धिं स्वेदं च॥ तेषां यथास्वं शोधनं क्षपणं च
स्वेदस्त्वचो दौर्गंध्यं कंडूं च। आर्तवमंगमर्दमतिप्रवृत्तिं दौर्बल्यं च। स्तन्यं स्तनयोरापीनत्वं मुहुर्मुहुः प्रवृत्तिं तोदं च॥ × क्षया
दविरुद्धैः क्रियाविशेषैः प्रकुर्वीत॥ पूर्वः पूर्वोऽतिवृद्धत्वात् वर्द्धयेद्धि परं परं। तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितं। बल
लक्षणं बलक्षयलक्षणं चात ऊर्द्ध्वं वक्ष्यामः। तत्र रसादीनां शुक्रांतानां धातूनां यत्परं तेजः तत्खल्वोजस्तदेव बलमित्यु
च्यते। स्वशास्त्रसिद्धांतात् तत्र बलेन स्थिरोपचितमांसता सर्वचेष्टास्वप्रतिघातः स्वरवर्णप्रसादो बाह्यानामभ्यंतराणां
च करणानामात्मकार्यप्रतिपत्तिर्भवति। भवति चात्र। ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरं। विविक्तं मृदु मृत्स्नं

शिलाजतुगुग्गुलुगोमूत्रत्रिफलालोहरजोरसांजनमधुयवमुद्गकोरदूषकश्यामाकोद्दालकादीनांरूक्षणछेदनीया
नां च द्रव्याणां विधिवदुपयोगो व्यायामो लेखनबस्त्युपयोगश्चेति। तत्र पुनर्वातलाहारसेविनोतिव्यायामव्यवायाध्ययन
चिंताभयशोकशोकध्यानरात्रिजागरणपिपासाक्षुत्कषायाल्पाशनप्रभृतिभिः उपशोषितो रसधातुः शरीरमनुक्रा
मन्नल्पत्वात् न प्रीणयति तस्मादतिकार्श्यं भवति। सोतिकृशः क्षुत्पिपासाशीतोष्णवातवर्षभारादानेष्वसहिष्णुर्वा
तरोगप्रायोल्पप्राणश्च क्रियासु भवति॥ श्वासकासशोषप्लीहोदराग्निसादगुल्मरक्तपित्तानामन्यतमं प्राप्य मरणमु
पयाति। सर्व एव चास्य रोगा बलवंतो भवंति। अल्पप्राणत्वाद तस्तस्योत्पत्तिहेतुं परिहरेत्। उत्पन्ने तु पयस्याश्वगंधा
विदारीविदारिगंधाशतावरीबलातिबलानागबलानां मधुराणामन्यासां चौषधीनामुपयोगः। क्षीरदधिघृतमांसशा
लिषष्टिकगोधूमानां च दिवास्वप्नब्रह्मचार्याव्यायामबृंहणबस्त्युपयोगश्चेति। यः पुनरुभयसाधारणान्युपसेवते तस्या
न्नरसः शरीरमनुक्रामन् धातूनुपचिनोति। समधातुत्वान्मध्यशरीरो भवति। सर्वक्रियासु समर्थः क्षुत्पिपासाशीतो
ष्णवातवर्षातपसहो बलवांश्च सततमनुपालयितव्यो भवति॥ भवति चात्र॥ अत्यंतगर्हितावेतौ सदा स्थूलकृशौ न

तामलभमानोथ तिर्य्यक्प्रच्यक्ति र्म्यापतौत्ट स्मात्रिर्बलहानिञ्जनिलप्रकोपमरणानिस्युस्येतत्र स्नेहपानाभ्यंगप्रदेहपरि
षेकः लद्घनानिक्षयविदधित। भवंतिचात्र। दोषधातुमलक्षीणोबलक्षीणोपिवा नरः। स्वयोनिवर्द्धनं भोक्तुं अन्नपानेप्र
कोस्यते॥१॥ यद्यदाहारजातेहिक्षीणः प्रार्थयते नरः। तस्यतस्यसलाभेन तंतं क्षयमपोहति॥२॥ यस्यधातुः क्षयाद्वायुः संज्ञा
कर्म्म विनाशयेत्। प्रक्षीणंचबलंयस्य नासौशक्यश्चिकित्सितुं॥ पूर्वः पूर्वोतिवृद्धत्वात् वर्द्धयद्धिपरंपरं। तस्मादतिप्रवृद्धा
नांधातूनांह्रासनंहितं॥४॥ रसनिमित्तमेवस्थौल्यंकार्श्यं च॥ तत्रश्लेष्मलाहारसेविनोध्ययनशीलस्यअव्यायामिनोदि
वास्वप्नरतस्यचेआमएवान्नरसोमधुरतरश्चशरीरमनुक्रामन्नतिस्नेहान्मेदोजनयति॥ तदतिस्थौल्यमापादयति॥ त
मतिस्थौल्यमापादयति। तमतिस्थौल्यंक्षुद्रश्वासपिपासाक्षुत्स्वप्नस्वेदगात्रदौर्गंध्यंक्रथनंसादगद्गदत्वानिक्षिप्रमे
वाविशंति। सौकुमार्यान्मेदसः सर्वक्रियास्वसमर्थः। कफमेदोनिरुद्धमार्गत्वाच्चाल्पव्यवायोभवत्यावृतमार्गत्वात् शेषा
धातवोनआप्यायंते। इत्यर्थमतोअल्पप्राणोभवति। प्रमेहपिटकाज्वरभगंदरविद्रधिवातविकाराणामन्यतमंप्राप्यपं
चत्वमुपयाति॥ सर्वएवचास्यरोगाबलवंतोभवंत्यावृतमार्गत्वात्स्रोतसामतस्तस्योत्पत्तिहेतुंपरिहरेत्। उत्पन्नेतु
स

सुताति २

मा १

का० सुतो० २ विध्येत्। प्रतनुकं सूच्या बहुलमारया पूर्वं दक्षिणं कुमारस्य वामं कन्यायाः विंध्याच पिचुवर्त्तीं प्रवेशयेत्॥ सम्यक् विद्धमा
मतैलेन परिषेचयेत्। शोणितबहुत्वेन वेदनायां चान्यदेशविद्धमिति निरुपद्रवतया तद्देशविद्धलिंगं। तत्राज्ञेन
यदृच्छया विद्धासु शिरासु कालिकामर्म्मरिकालोहितकासोपद्रवा भवंति। कालिकायां ज्वरो दाहः श्वयथुर्वेदना
च भवति॥ मर्म्मरिकायां वेदनाज्वरो ग्रंथयश्च। लोहितकायां मन्यास्तंभोऽपतानकं शिरोग्रहः कर्णशूलानि भवंति।
तेषु च यथास्वं प्रतिकुर्वीत। क्लिष्टजिह्माप्रशस्तसूचीव्यधाद्वगाढवर्त्तित्वाद्दोषसमुदायात्प्रशस्तव्यधाद्वा यत्र सं
रंभो बलवान् वेदना वा भवति। तत्र वर्त्तिमपहृत्य मधुकैरंडमूलमंजिष्ठायवतिलकल्कैर्म्मधुघृतप्रगाढैरालेपये
त् तावत् यावत् सुरूढ इति सुरूढं चैनं पुनर्विध्येत्॥ विधानं तु पूर्वोक्तमेव। तत्र सम्यक् विद्धमामतैलेन परिषेचयेत्।
त्र्यहात्र्यहाद्वर्त्तिं स्थूलां स्थूलतरां दद्यात्परिषेकं च॥ तमेव। अथ व्यपगतदोषोपद्रवे कर्णे वर्द्धनकं कुर्यात्। भवति चा
त्र॥ एवं विवर्द्धितः कर्णश्छिद्यते तु द्विधा नृणां। दोषतो वाभिघाताद्वा संधानं तस्य मे शृणु। तत्र समासेन पंचदश कर्ण
संधिबंधाकृतयः। तद्यथा॥ नेमीसंधानकः उत्पलभेदको वल्लूरकः आसंगिमो गंडकर्णः आहार्यो निर्वेधिमो व्यायो २९।

पडु७ लघ्वेवर्द्धनार्थं ३

रुषाजीर

तौ। श्रेष्ठे। मध्यशरीरस्तु कृशः स्थूलात्तु पूजितः॥१॥ दोषप्रकुपितो धातून् क्षपयत्यात्मतेजसा॥ इद्धः स्वतेजसा वह्नि
रुखागतमिवोदकं॥२॥ वैलक्षण्यात्शरीराणां अस्थायित्वात्तथैव च॥ दोषधातुमलानां तु परिमाणं न विद्यते॥३॥ ए
षां समत्वं यच्चापि भिषग्भिरवधार्यते। न तत्स्वास्थ्यादृते शक्यं वक्तुमन्येन हेतुना॥४॥ दोषादीनां त्वसमतां अनुमा
नेन लक्षयेत्॥ अप्रसन्नेंद्रियं वीक्ष्य पुरुषं कुशलो भिषक्॥५॥ जठरानलदौर्बल्यात् अविपक्वस्तु यो रसः। स
आमसंज्ञको दोषः सर्वव्याधिप्रकोपनः॥६॥ समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेंद्रियमनाः स्वस्थ
इत्यभिधीयते॥७॥ स्वस्थस्य रक्षणं कुर्यात् अस्वस्थस्य तु बुद्धिमान्॥ क्षपयेद्बृंहयेच्चापि दोषधातुमलान् भि
षक्॥८॥ तावत् यावद रोगः स्यात् नरो रोगसमन्वितः॥ ॥इति सौश्रुते सूत्रस्थाने पंचदशोध्यायः॥ ॥अ
थातः कर्णव्यधबंधविधिमध्यायं व्याख्यास्यामः॥ ॥अथ खलु रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येत्॥
तौ षष्ठे मासि सप्तमे वा शुक्ले पक्षे प्रशस्तेषु तिथिकरणमुहूर्तनक्षत्रेषु कृतमंगलस्वस्तिवाचनं धात्र्यंके कुमारमु उवार
पवेश्य बालक्रीडनकैः प्रलोभ्याभिसांत्वयन् भिषग्वामहस्तेनाकृष्य कर्णं दैवकृते छिद्रे शनैः शनैर्दक्षिणहस्तेन
पू

एकैवतुनवेत्पालिःस्थूलापृथ्वीस्थिरातुया।तोद्विधापाटयित्वातुछित्वाचोपरिसंधयेत्॥३॥गंडादुत्पाद्यमांसेन
सानुबंधेनजीवता।कर्णपालिमपालेस्तुकुर्यात्निर्लिख्यशास्त्रवित्॥४॥अतोन्यतमंबंधंचिकीर्षुरग्रोपहर
णीयोक्तोपसंभृतसंभारंविशेषतश्चात्रोपहरेत्।सुरामंडंक्षीरमुदकंधान्याम्लंकपालचूर्णंचेति।ततोंगनांपुरु
षंवाग्रथितकेशांतेलघुभुक्तवंतमाप्तैःसुपरिगृहीतंकृत्वाबंधमुपधार्यछेद्यभेद्यलेख्यव्यधनैरुपपन्नैरुपपाद्य
कर्णशोणितमवेक्ष्यदुष्टमदुष्टंचेति।तत्रवातदुष्टेधान्याम्लोष्णोदकाभ्यांपित्तदुष्टेशीतोदकपयोभ्यांश्लेष्मदुष्टेसु
रामंडोष्णोदकाभ्यांप्रक्षाल्यकर्णौपुनराविलिख्यानुन्नतमहिनमाविषमंचेत्कर्णसंधिंसंन्निवेश्यस्थितरक्तंसंनि
दध्यात्।ततोमधुघृतेनाभ्यज्यपिचुप्लोतयोरन्यतरेणावगुंठ्यसूत्रेणानवगाढमशिथिलंबध्वाकपालचूर्णैरवकी
र्याचारिकमादिशेत्।द्विव्रणीयोक्तेनविधानेनोपचरेत्।भवतिचात्र।विघट्टनंदिवास्वप्नंव्यायाममतिभोज
नं।व्यवायमग्निसंतापंवाक्श्रमंचविवर्जयेत्॥१॥आमतैलपरीषेकंत्रिरात्रमवचारयेत्॥ततस्तैलेनसंसृष्टंत्र्य
हादपनयेत्पिचुं।नचाशुद्धरक्तमप्रवृत्तरक्तंक्षीणरक्तंवासंनिदध्यात्॥सहिवातदुष्टेरक्तेरूढोपिपरिपुटवान्॥

चेक्रभाष्य २

जिमः॥ कपाटसंधिकोऽर्द्धकपाटसंधिकः संक्षिप्तो हीनकर्णो वल्लीकर्णो यष्टिकर्णः काकोष्ठिक इति। तेषु पृथुलाय
तसमोभयपालिर्नेमीसंधानकः वृत्तायतसमोभयपालिरुत्पलभेद्यकः। ह्रस्ववृत्तसमोभयपालिर्वल्लूरकः॥ अभ्यं
तरदीर्घैकपालिरासंगिमः। बाह्यदीर्घैकपालिर्गंडकर्णः। अपालिरुभयतोप्याहार्य्यः। पीठोपमपालिरुभयतः क्षीण
पत्रिकाश्रितो निर्वेधिमः। स्थूलाणुसमविषमपालिर्व्यायोजिमः। अभ्यंतरदीर्घैकपालिरितराल्पपालिः कपाटसंधि
कः। बाह्यदीर्घैकपालिरितराल्पपालिरर्द्धकपाटसंधिकः। तत्र दशैते कर्णबंधविकल्पाः साध्यास्तेषां नामभिरेवा
कृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पंचाऽसाध्याः। तत्र शुष्कशष्कुलिरुत्सन्नपालिरितराल्पपालिः संक्षिप्तः। अन
धिष्ठान(पालि)पर्यंतयोः क्षीणमांसो हीनकर्णः। तनुविषमाल्पपालिर्वल्लीकर्णः। ग्रथितमांसस्तब्धशिरातोऽसूक्ष्म
पालिर्यष्टीकर्णः। निर्मांससंक्षिप्ताग्राल्पशोणितपालिः काकोष्ठिक इति साध्येष्वपि बंधेष्वपि शोफदाहरागपाक
पिडिकास्रावोपद्रवयुक्ता न सिद्धिमुपयांति। भवंति चात्र। यस्य पालिद्वयमपि कर्णस्य न भवेद्धि ह कर्णपीठं समे मध्ये
तस्य निर्विध्य वर्द्धयेत्। बाह्यायामिह दीर्घायां संधिराभ्यंतरो भवेत्॥ अभ्यंतरायां दीर्घायां बाह्यसंधिरुदाहृतः॥ २

स्थिरः।सुरूढो वेदनो यस्तु तं कर्णं वर्धयेत्शनैः॥७॥ कर्णपाल्यामयान्नृणां पुनर्वक्ष्याम्यसुश्रुतः॥कर्णपाल्यां
प्रकुपिताः वातपित्तकफास्त्रयः॥८॥ द्विधा त्रिधा च संसृष्टाः कुर्वंति विविधा रुजः।विस्फोटास्तब्धताः शोफाः पा
ल्यां दुष्टे तु वातिके॥९॥ दाहविस्फोटजननं शोफपाकश्च पैत्तिके।कंडूश्च श्वयथुस्तंभो गुरुत्वं च कफात्मके॥१०॥
यथादोषं च संशोध्य कुर्यात्तेषां चिकित्सितं॥ स्वेदाभ्यंगपरीषेकैः प्रलेपास्रविमोक्षणैः॥११॥ मृद्वीं क्रियां बृंह
णीयैः यथास्वं भोजनैस्तथा।य एवं वेत्ति दोषाणां स चिकित्सां कर्तुमर्हति॥१२॥ अत ऊर्ध्वं नामलिंगैर्वक्ष्ये पाल्यामु
पद्रवान्।उत्पाटनो ह्युत्पटनः श्यावकंडूयते न्हशो॥१३॥ अवमंथः सकंडूको ग्रंथिको जंबुलस्तथा।स्रावी विदा
दिवौश्चैव [illegible]एवेषां के मतः क्रियाः॥१४॥ अपामार्गः सर्जरसः पाटलालकुचत्वचौ।उत्सद्यमाने लेपः स्यात्तैल
मभिश्च पातयेत्॥१५॥ श्यामाकशिंशुहस्तीकगोधामेदोऽथ तद्वसा।वाराहमस्यमेलेयपित्तं सर्पिश्च संसृजेत्
॥१६ लेपमुत्पटके दद्यात्तैलमेभिश्च साधितं।गौरीं सुगंधां संस्यामं अनंतां तंदुलीयकां॥१७॥ श्यावे प्रलेपं
संदद्यात्तैलमेभिश्च साधितं॥ पाठारसांजनं सौद्रं तथा स्याद्दम्ल काजिकं॥१८॥ तन्याले पं सकंडूके तैलमे

पित्तदुष्टेदाहपाकरागवेदनावान्। श्लेष्मदुष्टस्तब्धकंडूमान्। अपद्रवरक्ते स्रावशोफवान्। क्षीणोल्पमांसो न वृद्धिमुपैति। स यदा सुरूढो निरुपद्रवः सवर्णो भवति। तदैनं शनैः शनैरभिवर्द्धयेत्। अतोन्यथा संरंभदाहपाकरागवेदनावान् पुनश्छिद्यते च। अथ स्योपदुष्टस्याभिवर्द्धनार्थमभ्यंगः। तद्यथा। गोधाप्रतुदविष्किरानूपौदकमांसवसामज्जसर्पिः तैलं गौरसर्षपबैजं यथालाभं संहृत्य अर्कालर्कबलातिबलानंतापामार्गाश्वगंधाविदारिगंधाक्षीरशुक्लाजलशूकयवमधुकमधुरकवर्ग्यपयस्याप्रतिवापं तैलं पाचयित्वा स्वनुगुप्तं निदध्यात्। स्वेदितोन्मर्दितं कर्णं स्नेहेनैतेन योजयेत्। अथानुपद्रवः सम्यक्बलवांश्च विवर्द्धयेत्॥१॥ यवाश्वगंधायष्ट्याह्वैस्तैलेनोद्वर्तनं हितं। शतावर्य्यश्वगंधाभ्यां पयस्यारंडजीवनैः॥२॥ तैलं विपक्वं सक्षीरमभ्यंगात्पालिवर्द्धनं॥ ये तु कर्णा न वर्द्धंते बृहि विनानेन योजिताः॥३॥ तेषामपांगदेशे तु कुर्यात्प्रच्छनमेव च। बाह्यच्छेदं न कुर्वीत व्यापदस्तु ततो ध्रुवा॥४॥ अमिताः कर्णबंधास्तु विज्ञेयाः कुशलैरिह॥ यो यथा सुविनिष्टः स्यात् तं तथा विनियोजयेत्॥५॥ अरूढं तु यदा कर्णं सहसैवाभिवर्द्धयेत्। आमकोशीसमाध्मातः क्षिप्रमेव विमुच्यते॥६॥ जातरोमा सुवर्त्मा च श्लिष्टसंधिः सम

जीर्णे स्निग्धो विरिक्तश्च यथोपदेशं ॥३०॥ रूढं च संधानमुपागतं स्यात् तद्दुर्दशोषं तु पुनर्निरस्तुंते। हीनां पुनर्वर्द्धयितुं यतेत समां च कुर्यादतिवृद्धमांसां ॥३१॥ नाडीयोगं विनौष्ठस्य नासासंधानेव द्धिर्द्धिं। य एवमेवं जानी-
यात् स राज्ञः कर्तुमर्हति॥ ॥इति सौश्रुते सूत्रस्थाने षोडशोऽध्यायः॥१६॥ ॥अथातः आमपक्वैषणी-
यमध्यायं व्याख्यास्यामः॥ ॥अथ शोफसमुत्थाना ग्रंथिविद्रध्यलजीप्रभृतयः॥ प्रायेण व्याधयोऽभिधास्युते।
अनेकाकृतयः तैर्विलक्षणउन्नतः पृथुर्ग्रथितः समो विषमो वा त्वग्मांसस्थायी दोषसंघातः शरीरैकदेशोत्थि-
तः शोफ इत्युच्यते॥ स षड्विधो वातपित्तकफशोणितसन्निपातागंतुनिमित्तः। तस्य दोषरूपव्यंजनैर्लक्षणानि
व्याख्यास्यामः॥ तत्र वातश्वयथुररुणः कृष्णो वा परुषो मृदुः अनवस्थितास्तोदादयश्चात्र वेदनाविशेषा भवं-
ति॥ श्लेष्मश्वयथुः पांडुः शुक्लो वा कठिनः स्निग्धो मंदानुसारी कंड्वादयश्चात्र वेदनाविशेषाः भवंति। संनिपातश्व-
यथुः सर्वदोषविशेषलिंगोपेतः॥ पित्तवच्छोणितजोतिकृष्णः पित्तरक्तलक्षणः। आगंतुर्लोहितावभासश्च स यदा
बाह्याभ्यंतरैः क्रियाविशेषैर्न संभावितः प्रशमयितुं क्रियाविपर्ययाद्बहुत्वाद्वा दोषाणां तदा पाकमभिमुखो भ-
शोफाद्वमनविरेचनादि

निश्च साधितं। प्रलीनं तस्य देयं स्यादिदं तैलं विजानता ॥१९॥ मधुकं क्षीरकाकोली जीवकाद्यैर्विपाचितं। गोधावराह
सर्प्पाणां वसाः स्युः स्नतद्द्हणे ॥२०॥ प्रलेपनमिदं दद्यात् द्रवसिद्धार्थमन्थके। अपौंडरीकं मधुकं समंगां धवमेव च ॥२१
तैलमेभिश्च संपक्वं स्फेटकंद्रुमतः क्रियां। सहदेवा विश्वदेवा अजाक्षीरं ससैंधवं ॥२२॥ एतैरालेपनं दद्यात् तैलमेभिश्च
साधितं। ग्रंथिके गुटिकां पूर्वं श्रावयेदवपाचयेत् ॥२३॥ ततः सैंधवचूर्णेन घृष्ट्वालेपं प्रदापयेत्। लिखित्वा वाश्रु
तं घृष्ट्वा चूर्णैः रोध्रस्य जंबुलं ॥२४॥ क्षारेण प्रतिसार्य्यैनं शुद्धं संरोपयेत्ततः। मधुपर्णी मधूकं च मधुकं मधुतासह ॥२५
लेपः श्राविणि दातव्यं तैलमेभिश्च साधितं। पंचवल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः ॥२६॥ जीवकाद्यैः ससर्पिष्कैः
दह्यमानं प्रलेपयेत्। विश्लेषितायास्त्वथ कर्णनासिकायाः वक्ष्यामि संधानविधिं यथावत् ॥ नासाप्रमाणं पृथिवीरुहा
णां पत्रं गृहीत्वा त्ववलंबितस्य ॥२७॥ तेन प्रमाणेन हि गंडपार्श्वादुत्कृत्य बद्धं त्वथ नासिकाग्रं। विलिख्य चाशु प्रतिसंद
धीत तत्साधुबद्धं भिषगप्रमत्तः ॥२८॥ सुसंहितं सम्यगतो यथावत् नाडीद्वयेनाभिसमीक्ष्य बद्धा। प्रोन्नम्य चैनामवचूर्ण
येत्तु पतंगयष्टीमधुकांजनैश्च ॥२९॥ संछाद्य सम्यक् पिचुना व्रणं तैलेन सिंचेदसकृत्तिलानां। घृतं च पाय्यः स नरः सु

वति। तस्मामस्य पच्यमानस्य पक्वस्य लक्षणमुच्यमानमुपधारये। तत्र मंदोष्मता त्वक्सवर्णता शीतशोफता स्थैर्यं मं
दवेदनताल्पशोफता चामलक्षणमुद्दिष्टं। सूचीभिरिव निस्तुद्यते। दश्यत इवापिपीलिकाभिः ताभिश्च संसर्प्यत इ
व छिद्यत इव शस्त्रेणाभिद्यत इव च शक्तिभिस्ताड्यत इव च दंडेन पीड्यत इव च पाणिना॥ घर्ष्यत इव चांगुल्या दह्यते।
पच्यत इव चाग्निक्षाराभ्यामोषचोषपरिदाहाश्च वेदना भवंति॥ वृश्चिकविद्ध इव च स्थानासनशयनेषु न शांतिमुपैति॥
आध्मातबस्तिरिवाततश्च शोफता वलीप्रादुर्भावस्त्वक्परिपुटने निम्नदर्शनं। अंगुल्यावपीडिते प्रत्युन्नमनं बस्ता
विवोदकसंचरणं च हृदयस्य प्रपीडयत्येकमेतमेते चावपीडिते मुहुर्मुहुः स्त्रोदः कंडूरुन्नतव्याधिरुपद्रवशांतिर्भ
क्ताभिकांक्षा च पक्वलिंगं। कफजेषु तु रोगेषु गंभीरगति। त्वादभिघातजेषु च पाके चेषु किंचिदसमस्तं पक्वलक्ष
णमुदिश्य दृष्ट्वा पक्वमप्यपक्वमन्यमानो भिषक् मोहमुपैति। तत्र हि त्वक्सवर्णताशीतशोफतास्थैर्यमल्परुजता
श्मवच्च घनतां न मोहमुपेयादिति। भवंति चात्र॥ आमं विदह्यमानं च सम्यक् पक्वं च यो भिषक्। जानीयात्स भवेद्वैद्यः
शेषास्तस्करवृत्तयः॥१॥ वाताद्दते नास्ति रुजा न पाकः पित्ताद्दते नास्ति कफाच्च पूयः। तस्मात्समस्तान्परिपाककाले

लेपञ्चेति शोफांस्त्रय एव दोषाः॥ तस्माच्च सर्वैस्त्रिभिरेव दोषैः संपाकमायाति विकारसंज्ञः। कालांतरेणाभ्युदितं तु
पित्तं कृत्वा वशे वातकफौ प्रसह्य॥२१॥ पचत्यतः शोणितमेव पाको मतोपरेषां विदुषां द्वितीयः। तत्रामच्छेदे मांससिरा
स्नायुसंध्यव्यापादनं। शोणितातिप्रवृत्तिर्वेदनाप्रादुर्भावोवदरणमनेकोपद्रवदर्शनं॥ क्षतविद्रधिर्वा भवति।
स यदा नयमोहाभ्यां पक्वमप्यपक्वमिति मन्यमानश्चिरमुपेक्षते। व्याधिं वैद्यस्तदा गंभीरानुगतो द्वारमलभमानः स्व
यः स्वमाश्रयमवदार्योत्संगं महांतमवकाशं कृत्वा नाडीं जनयित्वा कृच्छ्रसाध्यो भवत्यसाध्यो वेति। भवति चात्र॥
यश्छिनत्त्याममज्ञानात् यश्च पक्वमुपेक्षते। श्वपचाविव मंतव्यौ तावनिश्चितकारिणौ। प्राक्शस्त्रकर्मणश्रेष्ठं भोजये
दातुरं भिषक्। मद्यपं पाययेन्मद्यं तीक्ष्णं यो वेदनासहः॥ न मूर्छत्यन्नसंयोगात् मत्तः शस्त्रं न बुध्यते॥२॥ तस्मादवश्यं
भोक्तव्यं रोगेष्वेतेषु कर्मणि। प्राणोह्यान्येतरोन्नलोबाधैः प्राणगुणान्वितः॥ ३॥ धारयेत्स्वविरोधेन शारीरं पांचभौ
तिकं॥ अल्पो महान्वा क्रियया विनायः समुत्थितः पाकमुपैति शोफः॥ विशालमूलो विषमं विदग्धः सलघुतोयान्त
वगाढदोषः॥ आलेपविश्रावणशोधनैस्तु सम्यक्प्रयुक्तैर्यदि नोपशाम्येत्। पच्येत शीघ्रं सममल्पमूले सपिडित

तत्र कोशमंगुष्ठांगुलिपर्वसु विदध्यात्। दाम संबाधेंगे संधिकूर्च्चकभ्रूस्तनांतरे कर्णेषु स्वस्तिकं स्थगिकां यमलव्र
णयोर्यमकं हनुशंखगंडेषु खट्वां मपांगयोश्चीनं पृष्ठोदरोरःसु विबंधं मूर्द्ध्नि वितानं चिबुकनासौष्ठांसबस्तिषु गोफ
णां जत्रुण ऊर्द्ध्वं पंचांगीं चेति। यो वा यस्मिन् शरीरप्रदेशे सुनिविष्टो भवति। तं तस्मिन् विदध्यात्। यत्र कर्म्म ऊर्द्ध्वमधस्ति
र्य्यक्च॥ तत्र घनां कवलिकां दत्वा वामहस्तपरिक्षेपमृजुमनाविद्धमसंकुचितं मृदुपट्टं निवेश्य बध्नीयात्। न च व्रणस्यो
परि कुर्य्यात्। ग्रंथिबाधकरं वा न च विकेशिको पृथु स्निग्धे अतिरूक्षे विषमे वा कुर्वीत। तस्मादतिस्नेहात् क्लेदो रौक्ष्या
च्छेदो दुर्न्यासाद्व्रणवर्त्मावघर्षणमिति। तत्र व्रणायतनविशेषात् बंधस्त्रिविधो गाढः समः शिथिल इति॥ पीडयन्नरु
जो गाढः सोच्छ्वासः शिथिलः समो बंधः प्रकीर्त्तितः॥ तत्र स्फिक्कुक्षिकक्षावंक्षणोरुशिरःसु गाढः। शाखावदनकर्णकं
ठमेढ्रमुष्कपृष्ठपार्श्वोदरोरःसु समः। अक्ष्णोः संधिषु शिथिल इति॥ तत्र पैत्तिकं गाढस्थाने समं बध्नीयात्॥ समस्थाने
शिथिलं शिथिलस्थाने नैव एवं शोणितदुष्टे च॥ तत्र श्लैष्मिकं शिथिलस्थाने समं समस्थाने। गाढं गाढस्थाने गाढतरं।
एवं वातदुष्टे च। तत्र पैत्तिकं शरदि ग्रीष्मे द्विरह्नो बध्नीयात्। रक्तोपद्रुतमप्येवं श्लैष्मिकं हेमंतवसंतयोः त्र्यहात् वातो

प्रद्रुतमप्येवं।एवमप्यूह्य बंधविपर्य्ययंच कुर्वीत।तत्र समशिथिलस्थानेषु गाढं बध्वे विकेसिकौषधनैरर्थक्यं शोफवेद
नोप्रादुर्भावश्च गाढसमस्थानेषु शिथिलबद्धे विकेषि कौषधपतनं पट्टसंचारात्व्रणवर्त्मावघर्षणमिति गाढशिथि
लस्थानेसमंबद्धेबंधगुणाभावइति॥ अविपरितबद्धे वेदनोपशांतिरसृक्प्रसादो मार्दवं च॥ अबध्यमानो दंशमशक
तृणकाष्टोपलपांशुशीतवातातपप्रभृतिभिरभिघातविशेषैरभिहन्यते। व्रणोविविधवेदनोपद्रुतश्च दुष्टतामुपैति।
आलेपनादीनि चास्य विशोषमुपयांति॥ चूर्णितमथितंचास्थि विश्लिष्टमतिपातितं। अस्थिस्नायुशिराछिन्नमाशुबंधेन
रोहति॥१॥ सुखमेव व्रणितः शेते सुखंगच्छति तिष्टते। सुखंशय्यासनस्थस्य क्षिप्रंसंरोहति व्रणः॥२॥ अबंध्याः पित्त
रक्ताभिघातविषनिमित्ताः तथाशोफतोददाहरागपाकवेदनाभिभूताः॥ क्षाराग्निदग्धाः पाकात्प्रकुपितशातमांसा
श्चनवंति कुष्टिनामविदग्धानांपिडिकामधुमेहिनां। व्रणाल्लघुणसिध्यंति येषांचापि व्रणेव्रणाः॥ कर्णिकाश्चोंदुरुवि
षविषदुष्टव्रणाश्चये। मांसपाकेचनबध्यंते गुदपाके चदारुणे। स्वबुध्याविनजेच्चापिल्लत्याल्लत्यांश्चबुद्धिमान्॥२॥
देशंदोषंच विज्ञायव्रणंचव्रणकोविदः॥ ऋतुंचपरिसंख्यायततोबंधान्निवेशयेत्॥५॥ ऊईति यगवस्थाचयत्रिण

लन्नंते। निरूढ्यालेपनसंज्ञः तेनाश्वावसेनिरोधोमृदुतास्तिमोसापकर्षणमेतन्निर्दोषताव्रणशुद्धिश्चजायते॥ उजये
गुणोज्ञालेपनेचालेपंरात्रौप्रयुंजीतमाहताशौल्यविहितोष्मणः तदनिर्गमात्तंविकारप्रकृष्टिरिति। त्वक्प्रसादनमेवाग्र्ये
मांसमेदःप्रसादे। दाहप्रशमनेश्रेष्ठतोदकंडूविनाशने। मर्मदेशेषुयरोगागुह्येषपितथाव्रणो॥ संशोधनायतेषांहिकुर्या
दालेपनंभिषक्॥२॥ अविदग्धेषुशोफेषुहितमालेपनंभवेत्॥ यथास्वंदोषशमनंदाहकंडूरुजापहं॥३॥ षड्भागपंत्रिके
स्नेहाश्चतुर्भागंतुवातजे॥ अष्टभागंतुकफजेस्नेहमात्रांप्रदापयेत्॥४॥ प्रदेहसाध्यव्याधौतुहितमालेपनंदिवा॥ पित्तरक्ता
भिघातोत्थेसविषेचविशेषतः॥५॥ नचपर्युषितंलेपंकदाचिदविचारयेत्॥ उपर्युपरिलेपंचनकदाचित्प्रदापयेत्॥६॥
ऊष्माणंवेदनांदाहंघनत्वाज्जनयेसहि। नचतेनैवलेपेनप्रदेहंदापयेत्पुनः॥७॥ शुष्काभावासनिवीर्योयुक्तोपिस्याद
पार्थकः॥ अतऊर्ध्वंव्रणबंधनद्रव्याण्युपदेक्ष्यामः॥ तत्यथा॥ क्षौमकर्पासाविकदुकूलपकौशेयासंतानिकाजोहानीति॥
तेषांव्याधिकालेचावेक्ष्योपयोगः। प्रकरणतश्चैषामादेशः॥ तत्रकोशदामस्वस्तिकानुवेल्लितमुत्तोलीमंडलस्थगिकाय
मकखट्वाचीनंविबंधवितानगोष्फणाः पंचांगिचेति चतुर्दशबंधविशेषास्तेषांनामभिरेवाकृतयः प्रायेणव्याख्याताः॥

चैक्ष्णतस्यात्

श्चोपरिसोऽन्यदोषः॥२॥ काष्ठेसमासाद्य यथा च वह्निर्वायुरीरितः संदहति प्रसह्य॥ तथैव सम्यग्विनिःसृतो हि मांसं शि
रास्नायुश्च खादतीह॥ आदौ विम्लापनं कुर्यात् द्वितीयमवसेचनं। तृतीयं उपनाहं च चतुर्थी पाटनक्रिया॥ पंच
मं शोधनं कुर्यात् षष्ठं रोपणमिष्यते। एते क्रमा व्रणस्योक्ताः सप्तमं वैकृतापहमिति॥ ॥इति आमपक्वैषणीयोध्या
यः समाप्तः॥ ॥अथातो व्रणालेपनबंधविधिमध्यायं व्याख्यास्यामः॥ ॥आलेपश्च आद्य उपक्रम एषः सर्वशोफा
नां सामान्यः प्रधानतमश्च भवंति। तं च प्रतिरोगं वक्ष्यामः॥ ततो बंधः प्रधानं तेन शुद्धिर्व्रणरोपणमस्थिसंधिस्थैर्यं
च। तत्र प्रतिलोमे हि सम्यगोषधमवतिष्ठते। अनुप्रविशति च॥ रोमकूपान् स्वेदवाहिभिः शरीराणुखैर्वीर्यं प्राप्नो
ति तस्य प्रमाणं महिषार्द्रचर्मोत्सेधमुपदिशंति। न च शुष्यमाणमुपेक्षेत ताऽन्यत्र पीडयितव्यात्। शुष्को ह्यपार्थको प्रदेहस्त्रे
रुक्करश्च। स त्रिविधः। आलेपः प्रदेहो लेपश्च तत्र प्रदेहालेपनयोरंतरं। आलेपः शीतस्तनुरविशोषी चः प्रलेपस्तु
स्नः शीतो वा बहुरविशोषी च। मध्यमो लेप इति विशेषतो रक्तपित्तप्रसादः उदालेपः। प्रदेहो वातश्लेष्मप्रशमनः से
पनस्त्रः शोधनो रोपणः। शोफवेदनापहः रश्चतस्योपयोगः सक्षतासक्षतेषु यस्तु क्षते उपयुज्यते स भूयः कल्क इतिसंज्ञां

सुखचेष्टाप्रचारः स्यात् स्वास्तीर्णशयने व्रणी। प्राच्यां दिशि स्थिता देवाः तत्पूजार्थं ततः शिरः॥ तस्मिन् सुहृद्भिरनुकूलैः
प्रियंवदैरुपास्यमानो यथेष्टमासीत्। नवेति चात्र॥ सुहृदो विक्षिपेत्त्वाशु कथायोगै रतिप्सितैः॥ आश्वासयन्तो बहु-
शः स्वनुकूला रुजो व्रणे॥ दिवा न निद्रावशगः स्यात्ततः श्वयसंभवः। दिवास्वप्नाद्व्रणे कण्डूर्गात्राणां गौरवं तथा॥२॥ श्वयथु-
र्वेदना रागः स्रावश्चैव भृशं भवेत्॥ उत्थानसंवेसनपरिवर्तनचंक्रमणोच्चैर्भाषणादिषु चात्मचेष्टास्वप्रमत्तो व्रणं सं-
रक्षेत्॥ स्थानासनं चंक्रमणं यानं यानाभिभाषणं। व्रणवान्न निषेवेत शक्तिमानपि मानवः॥१॥ उत्थानाद्यासने स्था-
ने शय्यायां चातिनिषेविते॥ प्राप्नुयान्मारुतात् रोगरुजोऽतस्तान् विवर्जयेत्॥ गम्यानां च स्त्रीणां संदर्शनसंभाषणसंस्पर्शना-
नि च दूरतः परिवर्जयेत्॥ स्त्रीदर्शनादिभिः शुक्रं कदाचिच्चलितं भवेत्॥ ग्राम्यधर्मनिमित्तान् दोषान् सा संसर्गेऽथवाप्नुया-
त्॥ नवधान्यमाषतिलकलायकुलत्थनिष्पावकहरितकशाकाम्ललवणकटुकगुडपिष्टविरूढतिवल्लूरशुष्कशाकाजा-
विकानूपोदकमांसवसाशीतोदककृशरापायसदधिदुग्धतक्रप्रभृतीन् परिहरेत्। तक्रान्तो नवधान्यादिर्योयं वर्ग उ-
दाहृतः। दोषसंजननो ह्येषः विज्ञेयः पूयवर्द्धनः॥१॥ मद्यपश्च मैरेयारिष्टासवसीधुसुराविकारान् परिहरेत्। मद्यमम्ल-

त्रिविधास्मृता। यथा च बध्यते बंधस्तथावस्थाम्प्रतीक्ष्य तः॥४॥ व्रणोकवलिकां दत्वा मृदुचैवाव पट्टकं॥ विकेशिकामौष
धं च नातिस्निग्धं समाचरेत्॥५॥ अक्लेदयत्यतिस्निग्धा तथा रौक्ष्यात्क्षिणोति च। युक्तस्नेहा रोपयति दुर्न्यस्ता वर्त्म वर्ष
ति॥६॥ विषमं च व्रणं कुर्यात्तस्मान्नयेत् श्रावयेत्तथा। यथाव्रणं विदित्वा तु योगं वैद्यः प्रयोजयेत्॥७॥ पित्तजे रक्तजे वा
पि सक्लेदे व परिक्षिपेत्। असक्लेदे तकफजे वापि वातजे पि विचक्षणः॥८॥ तलेन प्रतिपीड्याथ श्रावयेदनुलोमतः। सर्वा
श्च वेधो गूढान् तान्संधींश्च विनिवेशयेत्॥९॥ दुष्टस्याप्येष संधाने यथोक्तो विधिः स्मृतः। बुध्वात्मेषं स च यु
क्तेन तथा वास्थिषु जानता॥१०॥ उत्क्षिप्तेति निबणस्य शयने वाभिगच्छति॥ गच्छतो विविधैर्यानैः नास्य दुष्यति सव्रणः॥११॥
ये च स्युर्मांससंस्थाश्च त्वग्गताश्च तथा व्रणाः॥ संध्यस्थिकोष्ठप्राप्ताश्च शिरास्नायुगतास्तथा॥१२॥ तथावगाढा गंभीराः सर्वतो वि
षमस्थिताः। नैते साधयितुं शक्याः ऋते बंधात् भवंति हि॥ ॥ इति सूत्रस्थाने व्रणालेपनामाध्यायः॥ ॥अथातो
व्रणितोपासनीयमध्यायं व्याख्यास्यामः॥ ॥अथ व्रणिनः प्रथममेवागारं अन्विछेत्। प्रशास्तवास्तुनि गृहे वाताव
तपवर्जिते निवाते न च रोगास्युः शारीरागंतुमानसाः। तस्मिन् शयनं असंबाधं स्वास्तीर्णं मनोज्ञं प्राक्शिरस्कं सशस्त्रं कुर्वीत।

दुर्गी ३ द्राक्षपुष्पी २ मुण्डी २ शमी २

वेदविहितैरपरैश्चाशीर्विधानैः रूपाध्यायान्निषज्जसंध्ययोरस्योक्षयुः। सर्षपारिष्टपत्राभ्यां सर्प्पिषा। लवणे
न च। द्विरह्नः कारयेद्धूमं दशरात्रमतन्द्रितः॥ छत्रातिछत्रे सो गृह्णीजटिलो ब्रह्मचारिणी॥ लक्ष्मीगुहामतिगुहा
वचामतिविषां तथा। शतवीर्य्यां सहस्रवीर्य्यां सिद्धार्थकांश्च शिरसा धारयेत्। व्यजेत वालव्यजनैर्व्रणं विघट्टयेत्।
न तु हेन्मचकैर्दूयेत् शयानः परिपालयेत्। अनेन विधिना युक्तमाराद्वेव निशाचराः। वनेकेसरिणाक्रांतेव जी
यंति मृगा इव॥ जीर्णशाल्योदनं स्निग्धमल्पमुष्णद्रवोत्तरं। भुंजानो जांगलैर्म्मांसैः शीघ्रं व्रणमपोहति॥२॥ तेंदु
लीयकजीवंतीसुनिषण्णकवास्तुकैः। बालमूलकवार्त्ताकैः पटोलैः कारवेल्लकैः॥३॥ सदाडिमैः सामलकैः घृतमृ
ष्टैः ससैंधवैः। अन्यैरेवं गुणैर्वापि मुद्गादीनां रसेन वा॥४॥ सक्तून्विलेपीं कुल्माषान् जलं चापि सृतं पिबेत्। दिवा
न निद्रावशगो निशि वाऽग्रहगोचरः। व्रणी वैद्यवशो तिष्ठेत् शीघ्रं व्रणमपोहति॥ व्रणे श्वयथुरायासात् स च रागश्च
जागरात्॥ तौ च रुक् दिवास्वापात् च मृत्युश्च मैथुनात्॥ एवं स्तुतसमाचारो व्रणी संपद्यते सुखी॥७॥ आयुश्च दीर्घमा
प्नोति धन्वंतरिवचो यथा॥१०॥ ॥अथातो हिताहितीयमध्यायं व्याख्यास्यामः॥ ॥यद्वातोपपथ्यं तन्नित्रा

तथारूक्षंतीक्ष्णमुष्णंचवीर्य्यतः॥ आशुकारिचतत्पितंक्षिप्रंव्यापादयेत्व्रणं। वातातपरजोधूमावश्यायातिसेवना
दतिभोजनानिष्टश्रवणदर्शनेर्ष्यामर्षभयशोकध्यानरात्रिजागरणविषमासनशयनोपवासवाग्व्यायामस्थानचं
क्रमणरात्रिजागरणनियमशीतवातविरुद्धाशनाजीर्णमक्षिकाद्याबाधाः परिहरेत्। व्रणितः सततमस्सकारणोख
मादिभिः॥ क्षीणशोणितमांसस्यभुक्तंसम्यङ्नजीर्य्यते॥१॥ अजीर्णात्पवनादीनांविभ्रमोबलवान्भवेत्। ततःशोफ
रुजास्रावदाहपाकानवाप्नुयात्॥२॥ सदाचनीचनखरोमणाशुचिनाशुक्लवाससाशांतिमंगलदेवताब्राह्मणगुरु
परेणभवितव्यमपि॥ तत्कस्यहेतोः हिंसाविहारीणिरक्षांसिपशुपतिकुबेरानुचराणिमांसशोणितप्रियत्वात्क्षत
जनिमित्तंव्रणिनमुपसर्पंति। सत्कारार्थंजिघांसन्निवाकदाचित्तेषांसत्कारकामानांप्रयतेनांतरात्मनाधूपबलि
पहारांश्चरक्षोघ्नैवोपहारयेत्॥ तेतुसंतर्प्पिताआत्मवंतंनहिंस्युः। तस्मात्सततमतंद्रितोदकस्वजनपरिवृतो
नित्यदीपैरास्त्रेऽस्त्रग्दामपुष्पलाजाद्यलंकृतेवेश्मनिसंपन्नमंगलयुक्तामनोनुकूलाःकथाःशृण्वन्नासीत। सं
पन्नमंगलयुक्ताभिःकथाभिःप्रीतिमानसः। आसावाव्याधिमोक्षायक्षिप्रंसुखमवाप्नुयात्॥ ऋग्यजुस्सामाथर्व

स्यातमुद्रधाता कीक २   एकाह्निम नाजे ३   ७के २

उपदिष्टानि हिताहितानि तु॥ यद्वायोः पथ्यं तत्पित्तस्यापथ्यमिति संयोगादपराणि विषतुल्यानि भवंति॥ तद्यथा।
कुष्माउ वल्लीफलकवटीराम्लफललवणकुलत्थपिण्याकदधितैलविरोहिपिष्टशुष्कशाकाजाविकमांसमद्यजाम्बवचिलिचि
मत्स्यगोधावराहांश्च नैकध्यमश्नीयात्पयसा। अन्यत्ररोगोपसृष्टेन्यः रोगसात्म्यं च देशं च काले देहे च बुद्धिमान्। अ
वेक्ष्यावस्थादिकान् नावान् रोगहेतोः प्रयोजयेत्॥ अवस्थातरवाकृत्यात् रोगादीनां व्यवस्थितं। द्रव्यं नेच्छंति भिषजः इच्छं
ति स्वस्थलक्षणं। द्वयोरन्यतरादाने वदंति विषदुग्धयोः। दुग्धस्यैकांतहितता विषमेकांततोहितं। एवं युक्तरसेष्वेषु द्र
व्येषु सलिलादिषु॥ एकांतहितता विद्धि रससुक्ष्मतनान्यथा। अतो संयोगादहितानि वक्ष्यामः। न च विरूढधान्यैर्व
सामधुपयोवा माषैर्वा ग्राम्यानूपोदकपिशितादीनि। नाभ्यवहरेत्। न पयो मधुभ्यां रोहिणीशाकं वा शाकं वाश्नीयात्
बलाकां वारुणीकुल्माषाभ्यां काकमाचीं पिप्पलीमरिचाभ्यां नाडीनागरशाकं कुक्कुटं दधीनि चानैकध्यं मधु चो मोदकानुपा
नं पित्तेन चाम्लं मांसानि सुराकृशरापायसांश्च नैकध्यमश्नीयात्। सौवीरकेण सह तिलशष्कुलीं तक्रेण सह मधुघृतम
स्य धानां नाटि षतमांसानि मधुना गोधां मत्स्यान् सौद्रासवेन पृषतमांसं तेनैव तथा। मेरेयमाध्वीकाभ्यां च मत्स्यैः सह इक्षुवि

धोधाजन्यादीके   गोधरूनकाजिर

ह्रानुकरी नाग

स्यापथ्यमिति। अनेन हेतुना। नकिंचित् द्रव्यामेकांतेनहितमहितंवास्तीति। केचिदाचार्य्याब्रुवते॥ तत्तुनसम्यक्॥
इहकस्मात्द्रव्याणिस्वभावतः संयोगात् एकांतअहितानिहितानिचभवंति तत्रैकांतहितानिजातिसात्म्यात् सलि
लघृतदुग्धौदनप्रभृतिनियुक्तंरसंत्वात् एतानि एकांताहितानितु। दहनपचनमारणादिषुप्रवृत्ताग्निक्षारविषा
दीनिसंयोगादपराणिविषतुल्यानिभवंति। अपथ्यत्वात्॥ हिताहितानितु। यद्वायोःपथ्यंतत्पित्तस्यापथ्यमिति। अ
तसर्वप्राणिनांअयमाहारार्थेवर्गउपदिश्यते। तद्यथा॥ रक्तशालिषष्टिककंगुमुकुंदकपीतकप्रमोदककालकास पांडुक
नकपुष्पककर्दमकशकुनाहृतसुगंधककलमनीवारकोद्रवोद्दालकश्यामाकगोधूमयवेणवएणहरिणकुरंग
मृगमातृकाश्वदंष्ट्राकरालक्रकरकपोतलावतित्तिरकपिंजलवर्त्तीरिकवर्त्तकादीनिमांसानिमुद्गवनमकुष्ठकलाय
मसूरमंगल्यचणकहरेणवाढकीसतीनाः चिल्लिवास्तुकसुनिषण्णकजीवंतितंदुलीयकमंडूकपर्ण्यःगव्यंघृतंक्षौद्रं
सैंधवदाडिमामलकमित्येषवर्गःसर्वप्राणिनांसामान्यतः॥ तानितुस्वभावापथ्यसंयोगःसंस्कारःकर्म्ममानेस्यः।
पंचभिपथ्यतमश्चतथाब्रह्मचर्य्यनिवातशयनोष्णोदकनिशास्वप्नव्यायामाश्चैकांततःपथ्यतमाः एकांताहितानिप्रा

पाकान्यो। लवणतिक्तौ लवणकषायौ सर्वतः॥ कटुतिक्तौ रससवीर्यान्यो। कटुककषायौ तिक्तकषायौ च समतः॥ तरतमयो
गयुक्तौ च नावानीति रूक्षाणाति स्निग्धानात्युष्णानातिशीतानित्येवमादीन्वर्जयेत्। नवंतिचात्र। विरुद्धान्येवमादीनि
रसवीर्य्यविपाकतः। तान्येकांते हितानि स्युर्विषतुल्यानि वा पुनः। व्याधिमिंद्रियदौर्बल्यं मरणंवीविंगछति॥ विरुद्धसेर
वीर्य्यादीन्भुंजानोनात्मवान्नरः॥२॥ यत्किंचित्दोषमुत्क्लेश्य भुक्तं कायान्न निर्हरेत्। रसादिष्व यथार्थं च तद्विकाराय कल्
प्यते॥३॥ विरुद्धाशनजान्रोगान्प्रतिहंति विरेचनं। वमनं शमनं चापि पूर्वं वा हितसेवनं॥४॥ सात्म्यतोऽल्पतया वा
पि दीप्ताग्नेस्तरुणस्य च। स्निग्धव्यायामबलिनो विरुद्धं वितथं भवेत्॥५॥ व्यायामशीलो बलवान्शिशुश्च स्निग्धोऽग्नि
मांश्चापि महाशनश्च। प्राप्नोति रोगान्न विरुद्धजातान्नासात्म्यतो नाल्पतया च जंतुः॥ अथ वातगुणान्वक्ष्यामः॥ सर्वः सम
ग्रः स्निग्धो लवणश्चैव मारुतः। गुरुर्विदाहजननो रक्तपित्तविवर्द्धनः॥१॥ सतानो विषजुष्टानां व्रणिनः श्लेष्मलाश्च ये। ते
षामेव विशेषेण दोषरोगविवर्द्धनः॥२॥ वातलानां प्रशस्तश्च श्रांतानां कफरोगिणां। मधुरश्चाविदाही च कषायानुरसो ल
घुः॥३॥ दक्षिणो मारुतः श्रेष्ठः चक्षुष्यो बलवर्द्धनः। रक्तपित्तप्रशमनो न च वातप्रकोपणः॥ विशदो रूक्षपरुषः खरः स्नेह

सा हि२

गु आदे२

कांरान् । गुडेन काकमाचीं मधुना मूलकं च । गुडेन वाराहं मधुना च सह विरुद्धं । क्षीरेण मूलकमाम्रजांबवश्वावितश्
करगोधाश्च सर्वांश्च मत्स्यान् पयपयसा विशेषेणं चिलिचिमं कदलीफलं तालफलेन पयसा दध्ना तक्रेण वा लकुचफलं
दध्ना माषसूपेण वा । मधुना घृतेन वा । पयः पयसो तेवा अतः कर्म्मविरुद्धान्वक्ष्यामः ॥ कपोतान् सर्षपतैलभृष्टान्
वाद्द्यात् । कपिंजलमयूरलावतित्तिरिगोधाश्चैरंडदार्व्यग्निसिद्धा एरंडतैलसंमूर्छितान्वाद्यात् । मधु चोतरिक्षोदकानु
पानं कांस्यभाजने दशरात्रं पर्युषितं सर्पिर्मधु चोष्णैरुष्णेन वा । पस्य परिपचने श्रृंगबेरपरिपचने वा भाजने सिद्धां काक
पे १ माचीं तिलकल्कसिद्धमुपोदिकाशाकं नालिकेरेण वराहवसापरिभृष्टां बलाकां भासमंगारशूल्यं चना । श्रियादिति । अथातो मुद्री ५
तो मानविरुद्धं वक्ष्यामः ॥ मध्वंबुनी मानतस्तुल्येन समधीयात् । मधुस्नेहो जलस्नेहो वा । एवं तैलसर्प्पिषी तैलवसे तैलमज्जा
नौ सर्प्पिर्वसे सर्प्पिमज्जानौ वसामज्जानौ विशेषादांतरिक्षोदकानुपानौ । अतऊर्द्धं रसद्वंद्वानि रसतो वीर्य्यतो विपाकतश्च
विरुद्धानि वक्ष्यामः । तत्र मधुराम्लौ रसवीर्य्यविरुद्धौ । मधुरलवणौ च । मधुरकटुकौ च सर्वतः । मधुरतिक्तौ रसविपाकाभ्याम
धुरकषायौ च अम्ललवणौ च सर्वतः । अम्लकटुकौ रसविपाकाभ्यां । अम्लतिक्तौ । अम्लकषायौ च सर्वतः । लवणकटुकौ रसवि

र्व

[illegible]

[illegible]

व्याख्यास्याम॥ पित्तस्य यकृत्प्लीहानौ हृदयं दृष्टिः पूर्वोक्तं च त्वक्॥ एतानि दोषाणां स्थानान्यव्यापन्नानां भवंति चात्र।
विसर्गादानविक्षेपैः सोमसूर्यानिला यथा॥ धारयंति जगद्देहं कफपित्तानिलास्तथा॥ तत्र जिज्ञास्यं किं पित्तव्यतिरेकाद
न्यो ऽग्निराहो स्वित्पित्तमेवाग्निरिति। अत्रोच्यते। न खलु पित्तव्यतिरेकादन्यो ऽग्निरुपलभ्यते। आग्नेयत्वात्पित्ते दहन
पाचनादिष्वभिप्रवर्त्तमाने ऽग्निवदुपचारः क्रियते ऽन्तरग्निरिति। क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगात् अतिवृद्धे शीतक्रि
योपयोगादागमाच्च पश्यामो न पित्तव्यतिरेकादन्यो ऽग्निरिति। तच्चादृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं च
तुर्विधमन्नपानं पचति। विवेचयति च दोषरसमूत्रपुरीषाणि। तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरी
रस्य चाग्निकर्म्मणानुग्रहं करोति॥ तस्मिन्पित्ते पाचको ऽग्निरिति संज्ञा। यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन्रंजको ऽग्निरिति
संज्ञा। स रसस्य रागकृदुक्तः। यत्पित्तं हृदयस्थं तस्मिन्साधको ऽग्निरिति संज्ञा। सो ऽभिप्रार्थितमनोरथसाधनकृदुक्तः॥
यद्दृष्ट्यां पित्तं तस्मिन्नालोचको ऽग्निरिति संज्ञा। स रूपग्रहणेऽधिकृतः॥ यत्तु त्वचि पित्तं तस्मिन्भ्राजको ऽग्निरिति संज्ञा। सो
ऽभ्यंगपरिषेकावगाहालेपनादीनां क्रियाद्रव्याणां पक्ता छायानां च प्रकाशकः॥ पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च

बलापहः ॥ पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः ॥ ५ ॥ सद्यः प्राणः क्षयकरः शोषणस्तु शरीरिणां । उत्तर
मारुतः स्निग्धो मृदुर्मधुर एव च ॥ ६ कषायानुरसः शीतो दोषाणां चाप्रकोपणः । तस्माच्च प्रकृतिस्थानां क्लेदनो बलवर्
द्धनः ॥ ७ ॥ क्षीणक्षयविषार्त्तानां विशेषेण तु पूजितः ॥ ॥ इति सौश्रुते सूत्रस्थाने हिताहितीयमध्यायो विंश
तिमः समाप्तः ॥ ॥ अथातो व्रणप्रश्नमध्यायं व्याख्यास्यामः ॥ ॥ यथोवाच भगवान् धन्वंतरिः सुश्रुताचार्यः ॥
वातपित्तश्लेष्माण एव देहसंभवहेतवः ॥ एतैरेवाचाव्यापन्नैरधोमध्योर्द्ध्वसंनिविष्टैः शरीरमिदं धार्य्यते । अगारमि
वस्थूणाभिः तिसृभिरतस्त्रिस्थूणमाहुरेके । त एव चाव्यापन्नाः प्रलयहेतवः । तदेभिः शोणितचतुर्थैः संभवस्थितिप्र
लयेष्वप्यविरहितं शरीरं भवति । भवति चात्र ॥ नर्त्ते देहः कफादस्ति न पित्तान्न च मारुतात् ॥ शोणितादपि वा नि
त्यं देह एतैस्तु धार्य्यते ॥ तत्र वा गतिगंधनयोरिति धातुः । तप संतापे । श्लिष आलिंगने । एतेषां कृद्विहितैः प्रत्य
यैः वातश्लेष्माणि भवंति । दोषस्थानान्यत ऊर्द्ध्वं वक्ष्यामः ॥ तत्र समासेन वातः श्रोणिगुदसंश्रयः तदुपर्य्य
धो नाभेः पक्वाशयः । पक्वामाशयमध्यस्थं पित्तं आमाशयमध्यस्थः श्लेष्मणः । अतः परं पंचधा प्रविभज्यते । तत्र वातस्य वात

नावभासतां मंदोष्मतां चांगानां गौरवमालस्यं च श्रद्धानद्वेषश्चेति लिंगानि भवंति। तत्र प्रथमः क्रियाकालः। अत
उर्द्ध्वं प्रकोपणानि वक्ष्यामः। तत्र नाराहरणबलवद्विग्रहातिव्यायामव्यवायाध्ययनप्रपतनप्रधावनप्रपीडनाभिघातलंघनप्लवनत
रणरात्रिजागरणभारगजतुरंगरथपदातिचर्याकटुकषायतिक्तरूक्षलघुशीतवीर्यशुष्कशाकवल्लूरवरकोद्दालक
कोरदूषकश्यामाकनीवारमुद्गमसूराढकीहरेणुकलायनिःष्पावानशनविषमासनाध्यसनवातमूत्रपुरीषशुक्रछर्दि
क्षवथूद्गारबाष्पवेगविघातादिभिर्वायुः प्रकोपमापद्यते। स शीताभ्रप्रवातेषु घर्मान्ते च विशेषतः॥ प्रत्यूषस्यप
राह्णे च जीर्णेन्ने च प्रकुप्यति। क्रोधशोकभयायासोपवासविदग्धमैथुनोपगमनकट्वम्ललवणतीक्ष्णोष्णलघुविदाहि
तिलतैलपिण्याककुलत्थसर्षपातसीहरीतकशाकगोधामत्स्याजाविकमांसदधितक्रकूर्चिकामस्तुसौवीरकसुराविका
राम्लफलकट्वरप्रभृतिभिः। पित्तं प्रकोपमापद्यते। तदुष्णैरुष्णकाले मेघान्ते च विशेषतः। मध्याह्ने चार्द्धरात्रे च जीर्य
त्यन्ने च कुप्यति॥ दिवास्वप्नाव्यायामालस्यमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यंदिहायनकयवकनैषधेय
माषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसइक्षुविकारानूपोदकमांसवसाबिसमृणाल

चा। उष्णे कटुरसे चैव विदग्धे चाम्लमेव तु। श्लेष्मस्थानान्यत ऊर्द्धं वक्ष्यामः॥ तत्रामाशयः पित्ताशयस्योपरिष्टात्तत्प्र
त्यनीकत्वादूर्द्धगतित्वात्तेजसो निग्रहाय चंद्र इवादित्यस्य चतुर्विधस्याहारस्याधारः। स च तत्रोदकैर्गुणैराहारः प्रक्लि
न्नो भिन्नसंघातः सुखजरो भवति। माधुर्यात्पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च। आमाशये संभवति। श्लेष्मा मधुरशी
तलः। स तत्रस्थ एवात्मशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति॥ स क्लेदकः। उरस्थः त्रि
कसंधारणमात्मवीर्य्येणान्नरससहितेन हृदयावलंबनं करोति॥ सोवलंबकः। जिह्वामूलकंठस्थो जिह्वेंद्रियस्य सौम्य
त्वात् सम्यग्रसज्ञाने प्रवर्त्तते स बोधकः॥ शिरस्थः स्नेहसंतर्प्पणाधिकृतत्वादिंद्रियाणामनुग्रहं करोति। मात्मवीर्य्ये
ण स तर्प्पकः। संधिस्थः। श्लेष्मा सर्वसंधिस्त्वनुग्रहं करोति स श्लेष्मकः॥ श्लेष्मा शीतो गुरुः। स्निग्धः पिच्छिलः शीत एव च॥
मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः। तत्रस्थमेव शोषाणां शोणितस्थानानामनुग्रहं करोति॥ शोणितस्थाने
यकृत्प्लीहानौ तच्च प्रागभिहितं॥ अनुष्णशीतं मधुरं स्निग्धं रक्तं च वर्णतः। शोणितं गुरु विस्रं स्याद्विदाहश्चास्य पित्तव
त्॥ एतानि दोषस्थानान्येषु संचीयते दोषाः॥ प्राक् संचयहेतुरुक्तः॥ तत्र संचितानां दोषाणां स्तब्धपूर्णकोष्ठतापी

वेदनाप्रादुर्भावो वा मुहुर्मुहुः यत्रागच्छंति विविधवेदनाविशेषास्तं वातिकमिति विद्यात् ॥ ओषचोषपरिदाहधूमाय
नानि । यत्र गात्रमंगारावकीर्णमिव पच्यते । यत्र चोष्माभिवृद्धिः क्षते क्षारावसिक्त इव वेदनाविशेषास्तं पैत्तिकमि
ति विद्यात् । पित्तवद्रक्तसमुत्थं च जानीयात् । कंडूर्गुरुत्वं सुप्तत्वमुपदेहोऽल्पवेदनत्वं स्तंभः शैत्यं च यत्र तं श्लैष्मिक
मिति विद्यात् । यत्र सर्वासां वेदनानामुत्पत्तिस्तं सान्निपातिकमिति विद्यात् । अत ऊर्ध्वं व्रणवर्णान् वक्ष्यामः । भस्मक
पोतकास्थिवर्णः परुषोऽरुणः । कृष्ण इति मारुतजस्य नीलः पीतो हरितः श्यावः कृष्णो रक्तः कपिलः ॥ पिंगल इति ।
रक्तपित्तसमुत्थयोः श्वेतः स्निग्धः पांडुरिति श्लेष्मजस्य । सर्वव्रणवेदनोपेतः सान्निपातिक इति ॥ भवति चात्र ॥ न केव
लं व्रणेषूक्तो वेदनावर्णसंग्रहः । सर्वशोफविकारेषु व्रणवद्वै लक्षयेत्भिषक् ॥ ॥ इति सूत्रस्थाने द्वाविंशतितमो
ऽध्यायः ॥ ॥२२॥ अथातः कृत्याकृत्यविधिमध्यायं व्याख्यास्यामः ॥ ॥ तत्र वयस्स्थानां दृढानां प्राणवतां सत्त्वव
तामात्मवतां च सुखचिकित्स्या व्रणाः भवंति । एकस्मिन्वा पुरुषे यत्रैतद्गुणपंचकं । तस्य सुखसाध्यनीयतमा व्रणाः । त
त्र वयस्स्थानां प्रत्यग्रधातुत्वादाशु व्रणा रोहंति ॥ दृढानां स्थिरबहुमांसत्वात् शस्त्रमविचार्यमाणं शिरोस्नाय्वादीन्

घिरस्निग्धश्च संधिगतः समंतात्परिपीड्यमानो न प्रवर्त्तते ॥ आकुंचनप्रसारणोन्नमनाविनमनप्रधावनोत्कासनप्रवाहि
तैश्च प्रश्रवति ॥ आश्रावश्चात्र पिछलोऽवलंबी सफेनप्रयरुधिरोन्मथितश्च ॥ कोष्टगतोऽसृक्मूत्रपुरीषपूयोदकानि श्र
वति मर्म्मगतस्त्वगादिषु अवरुद्धत्वान्नोच्यते । तत्र त्वगादिगतानामाश्रवाणां यथाक्रमं पारुष्यस्यावाऽवस्पायदधिमस्तु
क्षारोदकमांसधावनपुलाकोदकसन्निभत्वानि मारुताद्भवंति । पित्तात् गोमेदकगोमूत्रभस्मशंखकषायोदकमाध्वी
कसन्निभत्वानि पित्तवद्व्याद तिविश्रवत्वं च । कफान्नवनीतकासीसमज्जपिष्टतिलनालिकेरोदकवराहवसास
न्निभत्वानि ॥ सन्निपातात्तु तिलनालिकेरोदकैर्वारुकरसकांजिकप्रसादोरुकोदकप्रियंगुफलयकृन्मुद्गयूष
सवर्णत्वानीति । श्लोकौ चात्र भवतः । पक्वाशयाद्याध्यस्तु पुलकोदकसंन्निभः । क्षारोदकनिभः श्रावो वज्योरस्कोश
यात्प्रवत् ॥ आमाशयात्कलायांभो नित्रिकसंधिजः । श्रावनैतान्परीक्षादौ ततः कर्मोचरेत् भिषक् ॥ अतऊ
र्द्ध सर्वव्रणवेदनाव्याख्यामः । तोदभेदनताडनछेदनायामनमंथनविक्षेपणचुमचुमायननिर्दहनावभंजनस्फोटनविदा
रणोत्पाटनकंपनविविधशूलविश्लेषणविकरणपूरणस्तंभनस्वपनाकुंचनांकुशिकाः संभवंति ॥ अनिमित्तविविध

सरंति॥कृत्स्नेर्द्धेवयवेवापियत्रांगेकुपितोभृशं।दोषोविकारंनभसिमेघवत्तत्रवर्षति॥नात्यर्थंकुपितश्चापिलीनो
मार्गेषुतिष्टति॥निःप्रत्यनीकःकालेनहेतुमासाद्यकुप्यति।तत्रवायोःपित्तस्थानगतस्यपित्तवत्प्रतीकारःपित्तस्य
कफस्थानगतस्यकफवत्प्रतीकारः।कफस्यवातस्थानगतस्यवातवदेषक्रियाविभागः॥एवंप्रकुपितानांप्रसर
तांवायोर्विमार्गगमनाटोपौ।ऊषचोषपरिदाहधूमायनानिपित्तस्यअरोचकाविपाकांगसादाछर्दिश्चेति।श्लेष्मणो
लिंगानिभवंति।तत्रतृतीयःक्रियाकालः।अतऊर्द्ध्वस्थानसंश्रयंवक्ष्यामः॥एवंप्रकुपितास्तांस्तान्शरीरप्रदेशान
भिगम्यतांस्तान्व्याधीनजनयंति।तेयदोदरेसन्निवेशंकुर्वंति।तदागुल्मविद्रध्युदराग्निसंगानाहविसूचिकाती
सारप्रभृतीन्जनयंतिबस्तिगताप्रमेहाश्मरीमूत्रादोषप्रभृतीन्मेढ्रगताःनिरुद्धप्रकाशोपदंशशूकदोषप्रभृ
तीन्गुदगताभगंदरार्शप्रभृतीन्।वृषणगतावृद्धीः।ऊर्द्ध्वगतजत्रुगतास्तूर्द्ध्वजान्त्वग्मांसशोणितस्थाःक्षुद्ररोगान्कुष्ठा
निविसर्पांश्चमेदोगताग्रंथ्यपच्यर्बुदगलगंडोऽलजीप्रभृतीन्अस्थिगताविद्रध्यनुशयीप्रभृतीन्मज्जशुक्रगतान्
दोषाणोव्याधयोननिर्द्दिष्टा।पादगताश्लीपदवातशोणितवातकंटकप्रभृतीन्सर्वांगगताज्वरसर्वांगरोगप्रभृतीन्।

कोहञ विषेषैः

कसेरुकशृंगाटकमधुरवल्लीफलशामनाध्यशनप्रभृतिभिः श्लेष्माप्रकोपमापद्यते॥ स शीतैः शीतकाले च वसं
ते च विशेषतः॥ पूर्वाह्ने च प्रदोषे च भुक्तमात्रे च कुप्यति॥ पित्तप्रकोपणैरेव चात्यर्थं द्रवस्निग्धगुरुभिश्चाहारैः। दि
वास्वप्नक्रोधानलातपश्रमाभिघाताजीर्णविरुद्धासनादिभिरसृक्प्रकोपमापद्यते॥ यस्मादसृक् विना दोषैः न कदाचित्प्र
कुप्यति॥ तस्मात्तस्य यथादोषं कालं विद्यात्प्रकोपणे॥ तेषां प्रकोपात्कोष्ठतोदसंचरणाम्लीकापिपासापरिदाहा
न्नद्वेषहृदयोत्क्लेदाश्च जायंते॥ तत्र द्वितीयः क्रियाकालः॥ अत ऊर्ध्वं प्रसरं वक्ष्यामः। तेषामेवमेतैर्विशेषैः प्रकुपि प्रकोपविशेषः ५
सुराबीजं तानां किण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति॥ तेषां वायुर्गतिमत्त्वात्प्रसरणहेतुः। सत्यप्यचैतन्ये स हि
रजोभूयिष्ठो रजश्च प्रवर्तकं सर्वभावानां यथा महानुदकसंचयोतिवृद्धः सेतुमवदार्यापरेणोदकेन व्यामिश्रः सर्व
तः प्रधावत्येवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरंति। तद्यथा। वातः पित्तं श्ले
ष्मा शोणितं वातपित्ते वातश्लेष्माणौ पित्तश्लेष्माणौ वातशोणिते। पित्तशोणिते श्लेष्मशोणिते। वातपित्तशोणितानि।
वातश्लेष्मशोणितानि। पित्तश्लेष्मशोणितानि। वातपित्तकफाः वातपित्तकफशोणितानि इति॥ एवं पंचदशधा प्र

स्त्रिपुटक इति। व्रणाकृतिसमासः॥ दोषास्तु विश्लिष्टास्तनायय्योदुरुपक्रमाः सर्वएव व्रणाः क्षिप्रं संरोहंत्यात्मवतां सुभि
षग्भिश्चोपक्रांताः। अनात्मवतामज्ञैश्चोपक्रांताः प्रदुष्यंति। प्रवृद्धत्वाद्दोषाणां तत्रातिसंवृतो विवृतः कठिनो मृदु
रुत्सन्नोऽतिशीतोत्युष्णः कृष्णरक्तपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरवः प्रतिपूयमांससिरास्नायुप्रच्छादि
मेहसारं श्रद्धिदृगात्रं स्थूलास्थिसंधिप्रांमोपचितं वप्रासक्तिग्धतांप्रनखनयनतालुजिह्वो राम·

ष्ठपाणिपादतलं रक्तेन सुवर्णनखृकं चत्वंमांसारं च क्तसारं विद्यात्॥ त्वपोश्चं प्रक्षनमायुः ६४

गावध

त्रिगत्करेधाक्ष
पत्र्याते

॥सौभाग्यमोरिति॥भवतिचात्र॥सामान्यतोऽप्यंगप्रमाणाद्यथसारतः॥परीक्ष्यायुःसुनिपु
णोभिषकसिध्यतिकर्मसु॥व्याधिविशेषास्तुप्रागभिहिताः॥सर्वएवैतेत्रिविधाःसाध्याया
प्याःप्रत्याख्येयाश्चातश्चैतानस्यत्रिकाःपरीक्षेत॥किमयंसोपसर्गःकिंप्राक्केवलोन्यलक्षण
इति॥तत्रोपसर्गःपूर्वोत्पन्नंव्याधिंजघन्यकालजातोव्याधिरुपसृजति॥सतन्मूलएवो
पद्रवसंज्ञः॥प्राक्केवलःप्रागेवोत्पन्नोव्याधिरपूर्वरूपोनुपद्रवश्च॥अन्यलक्षणोयोभवि
ष्यद्व्याधिख्यापकः॥सपूर्वरूपसंज्ञः॥तत्रसोपद्रवमन्योन्याविरोधेनोपक्रमेतबलवंतमु
पद्रवंवा॥प्राक्केवलंयथास्वं॥अन्यलक्षणेत्वादिव्याधौप्रयतेत॥भवतिचात्र॥नास्तिरोगो
विनादोषैर्यस्मात्तस्माद्विचक्षणः॥अनुक्तमपिदोषाणांलिंगैर्व्याधिमुपाचरेत॥प्रागभिहि
ताऋतवः॥शीतेशीतप्रतीकारमुष्णेचोष्णनिवारणं॥कृत्वाकुर्यात्क्रियांप्राप्तांक्रियाका

भ्रमोरतिविवर्णत्वादि
वीरोषरसहित

३

४ नहापयेत्ताश्च प्राप्ते वा क्रियाकाले न प्राप्ते वा न कृता क्रिया। क्रिया हीनातिरिक्ता वा साध्येष्व
६५ पि न सिध्यति। या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च। सा क्रिया न तु या व्याधिं हरत्य
न्यमुदीरयेत। प्राणामिहितो ग्निरन्नस्य पावकः॥ स चतुर्विधो भवति। दोषानभिपन्नएको वि
क्रियामापन्नास्तु विधो भवति विषमो वातेन तीक्ष्णः पित्तेन मंदः श्लेष्मणा। समः सर्वसा
म्यादिति। तत्र यो यथाकालमन्नमुपयुक्तं सम्यक् पचति स समः। यः कदाचित्सम्यक
पचति कदाचिदाध्मानशूलोदावर्त्तातीसारजठरगौरवांत्रकूजनप्रवाहणानि। कृत्वा
स विषमः॥ यः प्रभूतमप्युपयुक्तमाशु पचति स तीक्ष्णः। स एवाभिमानोत्यग्निरित्यभि
धीयते स मुहुर्मुहुः प्रभूतमप्युपयुक्तमाशुतरं पचति पाकांते च गलतालोष्ट राम
शोषदाहसंतापान्जनयति। यः स्वल्पमप्युपयुक्तमुदरशिरोगौरवकासश्वासप्र ६५

त्रिशं ३

सेकछर्दिगात्रसादनानिकृत्वामहताकालेनपचतिसमं॥ विषमोवातजान्रोगान्तीक्ष्णःपित्तनिमि
त्तजान्करोत्यग्निस्तथामंदोविकारान्कफसंभवान्॥ तत्रसमेपरीरक्षणंकुर्वीतविषमेस्निग्धलव
णैः क्रियाविशेषैःप्रतिकुर्वीततीक्ष्णेमधुरस्निग्धशीतैर्विरेकैश्चक्षीरदधिसर्पिर्भिर्मंदेकटुतिक्तक
षायैर्वमनैश्च॥ एवमेवात्यग्नौविशेषेणमाहिषैश्चक्षीरदधिसर्पिर्भिर्मंदेकटुतिक्तकषायैर्वमनैश्च॥ जा
ठरोभगवानग्निरीश्वरोन्नस्यपाचकः॥ सौक्ष्म्याद्रसानाददानोविवेक्तुंनैवशक्यते॥ प्राणापानसमाने
स्तुसर्वतःपवनैस्त्रिभिः॥ ध्मायतेपाल्यतेचापिस्वेस्वेस्थानेव्यवस्थितेः॥ वयस्तुत्रिविधंबाल्यंमध्यं
वृद्धमिति॥ तत्रोनषोडशवर्षाबालाः॥ तेत्रिविधाः क्षीरपाःक्षीरान्नादाअन्नादाइति॥ तेषुसंवत्सरपराःक्षीर
पाः॥ द्विसंवत्सरपराःक्षीरान्नादाःपरतोन्नादाइति॥ षोडशसप्तत्योरंतरेमध्यंवयः॥ तस्यविकल्पोवृद्धिर्यौव
नेसंपूर्णताहानिः॥ तत्राविंशतेर्वृद्धिरात्रिंशतोयौवनमाचत्वारिंशतः सर्वधात्विंद्रियबलवीर्यसंपू

तैश्चैवयौ१ त्पोर२ बौव

स्वजीट ~प्रति २

४ र्त्तिता। अत ऊर्द्धमीषत्परीहाणिर्यावत्सप्ततिः। सप्ततेरूर्द्धं हीयमाणधात्विंद्रियवलवीर्योत्साहमहन्य
६६ हनि वलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिश्यमानं सर्वक्रियास्वसमर्थं जीर्णागारमिवाभिवृष्ट
मवसीदंतं वृद्धमाचक्षते। तत्रोत्तरोत्तरासु वयोवस्थासूत्तरोत्तरा भेषजमात्राविशेषाः। ऋतेव परिहाने
स्तत्राद्यापेक्षया प्रतिकुर्वीत। भवंति चात्र॥ वाल्ये विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु। भूयिष्ठं वर्द्धते
वायुर्वृद्धे तद्वीक्ष्य योजयेत्। अग्निक्षारविरेकैस्तु वालवृद्धौ विवर्जयेत्। तत्साध्येषु विकारेषु मृद्वीं कुर्या
त्क्रियां शनैः॥ देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टः। कर्षयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ। रक्षणं
चैव मध्यस्य कुर्वीत सततं भिषक्॥ वलमभिहितगुणं। दौर्वल्यं तु स्वभावदोषजरादिभिरपेक्षितव्यं यस्मा
द्बलवैव तासु सर्वक्रियाप्रवृत्तिः। तस्माद्बलमेव प्रधानमधिकरणानां। केचित्तु कृशाः प्राणवंतः स्थू राम
ला श्चाल्पवला नराः। तस्मात्स्थिरत्वव्यायामैर्वलं वैद्यः प्रतर्कयेत्। सत्त्वं तु व्यसनाभ्युदयक्रिया ६६

मफकंवंदनंतथाशीतलाश्चगणाःसर्वेप्रलेपः पित्तशोफहृत् ॥ आगंतुजेरक्तजेवएषएवविधिस्मृतः विधिविषघ्नोविषजेपित्तघ्नोविहि
तल्पा । श्लेष्मजेगंधाश्चगंधयावकालीसरलयासह । एष्वेषिकाजप्युंगीवपत्रौलेपश्लेष्मशोफजित् ॥ एतेवर्गाश्चयोरोधंपथ्यापुंडितका
पिवश्चनंताचेतिलेपोयंशांजिपानिकशोफनुत् ॥ त्रिफलापालवणैर्वातेकोष्णः शीतपयोयुतः पित्तेउष्णः कफेक्षारमूत्राढ्यःस्वयशां
तयेसएमूलकनिःसृण्णंफलानितिलसर्षपाः संकवः किण्वमतसीद्रव्याण्युष्णानिपाचनः ॥ विरविल्वोग्निकोदंतीचित्रकोहयमारकः
कपोतककटद्राण्युरीषाणिश्चदारणं । क्षारद्रव्याणिवाक्षाणिवादारणंपरं । द्रव्याणांपिच्छिलानांनुत्वक्कल्कान्निपीडनंपव
गोधूममाषाणांचूर्णानिचसमासतः ओविलंकोटसुमनः करवीरसुवर्चलाः ॥ शोधनानिकषायाणिवर्गश्चारग्वधादिकः ॥ अजगंधा
जश्रृंगीवगवाक्षीलांगलाकृपापूतीकेचित्रकः पाठाविडंगैलाहरेणवः कटुत्रिकंयवक्षारोलवणानिमनःशिला कासीसंत्रिवृता
दंतीहरितालंसुराष्ट्रजासोधनानावर्तीनांद्रव्याण्येतानिनिर्दिशेत् ॥ एतैरेवौषधैः कुर्यात्कल्कानपिचशोधनान् । कासीसकटु
रोहिण्याः जातीकेहरिद्रयोः ॥ सर्वेदिह्नेषुवणेषुकुर्यात्तैलघृतानिवैः अर्कोत्तमासुराह्वीरेपिष्ट्वाक्षारोत्तमानपिजातीमूलंहरिद्रेदे
कासीसंकटुरोहिणीसर्वेदिद्दानिबोगानिरूपात्तंशोधनेघृतं । मयूरकोराजवृक्षोनिंबकोशातकीतिलाः ॥ वृहतीदंडकारीवृह
ितालेमनःशिला । शोधनानितपयोज्यानितैलद्रव्याणिशोधने कासीसंसैंधवंकिण्वंवचायोरजनीद्वयेशोधनांगेषुवर्तिःस्येषुचूर्णंकु
र्वीतशोधने । शालसारादिवर्गेषुपटोलत्रिफलासुवर्णरसक्रियाविधातव्याःशोधनीशोधनेषुवर्णाश्वस्थकेसर्जरसेसरलेदेवदारुणिसारे

वत्रादिनास्त्रकृत्तवरो ६२ मूर्डी ५ तजनं ४ गात्तपीवरं ५ मासवद्धने ७ बीलत्ने भाव मेजनं ७ आरफलमा सफलं

धपिचकुर्वीतमतिमान्व्रणधूपनंकषायाणामनुष्णानांचहृद्यानांत्वक्प्रसाधितंक्षीरिणीनांकषायंवाप्ररोपणंप्रशस्यतेसोमा
मृतास्वगंधासुकाकोल्यादौगणेतथाक्षीरप्ररोहेषुपिचवर्त्तयोरोपणास्मृताः समंगासोमसरलासोमवल्कंगंधासुकाकोल्यादौगणेत
थाक्षीरिप्ररोहेषुपिचवर्त्तयोरोपणास्मृताः वल्कैःसचंदनैःकाकोल्यादिवकल्कस्यात्प्ररोपणे॥पृथक्पर्ण्यात्मगुप्ताहरि
द्रेमालतीसिताकाकोल्यादिश्चयोज्यःस्यात्भिषजारोपणेघृते कालानुसार्यागुरुणीहरिद्रेदेवदारुचप्रियंगवश्चरोध्रंचतैलयोज्या
निरोपणेकंगुकात्रिफलाध्ररोध्रंकासीसंश्रवणंकृपा।चवाम्लकर्णयोत्वक्चरोपणेरक्तुणैभिषग्तैश्चियंगुकासजरसेपुष्पंकासीसमेवच
त्वक्चूर्णंवटजंचैवरोपणंप्रशस्यते।वह्नुयोचवर्गस्यत्रिफलायास्तथैवचारसक्रियारोपणीस्याद्दृढीतयथाक्रमं।मामार्गिस्च
गंधावतालपत्रीसुवर्चलातुल्यादनेप्रशस्यंतेकाकोल्यादिश्चयोगणः।कासीसंसैंधवंकिण्वंकुरुविंदोमनःशिलाकुक्कुटांडकपाला
निसुमनोमुकुलानिचा।फलेसैरेयकारंजेधातुचूर्णानियानिचाचूर्णान्यत्रमांसेषुप्रशस्तान्यवसादनेसमवक्तवुर्गमर्दवायथा
पिबाप्रयुंजीतभिषक्प्राज्ञोदृष्टकर्मसु॥ ॥इतिषट्त्रिंशोध्यायः॥ ॥अथातोभूमिप्रविभागीयमध्यायंव्याख्यास्यामः॥तत्रशर्कराश्मविषमव
ल्मीकश्मशानाघातनदेवायतनसिकताभिरनुपहतामनूषरामभंगुरामदूरेउदकांतस्निग्धांप्ररोहवतीमृद्वींस्थिरांसमांकृष्णांगौरींलो
हितांवाभूमिमौषधग्रहणायपरीक्षेततस्यांजातमपिकृमिविषशस्त्रातपपवनदहनतोयसंबाधमार्गैरनुपहतमेकरसंपुष्टंपृथ्वव राम
गाढमूलमुदीच्यांचौषधमाददीतेत्येषभूमिपरीक्षाविशेषःसामान्यविशेषवतस्तत्राश्मवतीस्थिरागुर्वीश्यामाकृष्णावास्थूलवृक्षस ६८

वत्सस्थान३ पृथ्वी क्षीरीस७ दिष्ट ४ गर्भ पुत्रो ३ छेदनार्तो ५ पाडु ४ फालक्षय ५

भ.स्का.२

पृथ्वीगुणाः २२ इष्टाः ७   अतिमधुर स्निग्ध शीत जानि याधीते एतेन शो द्रव्याकृति तत्र पृथिव्यं जोगुणाः २२ इष्टा
ते पृथ्व्याः २   यान्नसो ५

सप्रायामप्गुणभूयिष्ठा स्निग्धा शीतला स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्ला चाप्गुणभूयिष्ठा नानावर्णा लघ्व्यश्मव
ती प्रविरलाल्पपाण्डुवृक्षप्ररोहाग्निगुणभूयिष्ठा रूक्षा रासभवर्णा तनुरूक्षकोटराल्परसवृक्षप्रायाऽनिलगुणभूयिष्ठा मृद्वी स
मा श्वभ्रवती अव्यक्तरसजला सर्वतोऽसारवृक्षा महापर्वतवृक्षा श्यामा चाकाशगुणभूयिष्ठा तत्र केचिदाहुराचार्याः प्रावृड्
वर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीरसारफलान्याददीतेति तन्न सम्यक् कस्मात् सौम्याग्नेयत्वाज्जगतः सौ
म्यान्यौषधानि सौम्येष्वृतुष्वाददीतानि सोमगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्याददीताग्नेयान्याग्नेयगुणभूयिष्ठायां सं
जातानि एवं बलवत्तराणि भवन्ति सर्वाण्येव भिन्नवार्धिन्यत्र मधुघृतगुडपिप्पलीविडङ्गेभ्यः सर्वाण्येव संवत्सराणि वीर्यवन्ति तेषामसं
प्राप्तावतिक्रान्तवत्सराण्याददीतान्वयेन वा गोपालास्तापसा व्याधा ये वान्ये वनचारिणः मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते स
र्वावस्थासु पञ्चाशाल वर्णादिषु वष्पितेन कालेष्वित्र सर्वो विदीयते वर्णगंधरसोपेता षड्विधा भूमिरुच्यते। तस्माद्भू
मिस्वभावेन बीजिनः षड्रसा भूताः। अव्यक्तः किल तोयस्य रसो निश्चयनिश्चितः। रसः स एव चाव्यक्तो व्यक्तो भूमिरसात् भवेत्॥ सर्वद्रव्यं पुराणे
वा ग्राह्यमेवं विनिर्दिशेत्। विडङ्गपिप्पलीक्षौद्रं सर्पिश्चाप्यनवं हितं। शेषमन्यत्त्वभिनवं द्रव्यं ग्राह्यं दोषवर्जितं॥ गमानो व पर्ण्यां नार
क रोषमन खारदः क्षीरमूत्रपुरीषाणि जीर्णाहारेषु संहरेत्। प्लोतमृद्भाण्डफलकशङ्कुविन्यस्तभेषजं प्रशस्तायां दिशि शुचौ भेषजा
गारमिष्यते॥ इति सुश्रुते सूत्रस्थाने भूमिविभागीयो नामाध्यायः॥ ॥ अथातो द्रव्यगणसंग्रहणीयमध्यायं व्याख्यास्यामः॥ ॥ समासेन सप्तत्रिं

शत् विरेचनाद्यपराः स्यात् प्रदीपनीय
सादिभिः

[Left margin:] आकाशत्वया निःसार निर्मले पृथ्वी अ याथना नीलवि ति ५ सोमपान्यो वधानि सो मिषुरी ५
२४५

[Right margin:] आनिलगुणात्मक पिष्ट्याशामन इव्याणि उच्च यन्नः ५ द्रष्ट्वा उभयभागिनि ५
सत्यानि ध
तत्रूणा

शतद्व्यगुणं भवंति न घ्नावदा रिंगंधा विदारी विश्वदेवा सहदेवा स्वदंष्ट्रा पृथक्पर्णी शतावरी सारिवा जीवक ऋषभकौ महासह
हा क्षुद्रसहा वृहत्यौ पुनर्नवा एरंडो हंसपादि वृश्चिकाली ऋषभी चेति विदारिगंधाद्योयंगणः पित्तानिलापहः शोषगुल्मांगम
र्दोर्ध्वश्वासकासविनाशनः आरग्वधमदनगोपघोंटाकंटकीकुटजपाठापाटलीमूर्वीइंद्रयवसप्तपर्णनिंबकुरुंटकंकरवीरदासी
गुडुचीचित्रकशार्ङ्गेष्टाकरंजद्वयंपटोलकिराततिक्तकानि सुखवी चेति आरग्वधादिरित्येषगणः श्लेष्मविषापहः मेहकुष्ठज्वर
वमीकंडूघ्नो व्रणरोपणः शालसाराजकर्णखदिरकदरकालस्कंधक्रमुकभूर्जमेषशृंगीतिनिशचंदनकुचंदनशिंशपाशिरीषसनच
नार्जुनतालकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकं चेति शालसारादिरित्येषगणः कुष्ठविनाशनः मेहपांड्वामयहरः कफमेदोवि
शोषणः वरुणार्तगलः शिग्रुतर्कारीमेषशृंगीपूतीकनक्तहतीद्वयं चेति वरुणादिर्गणो ह्येष कफमेदोनिवारणः विनिहंति शिरःशूलगु
ल्माभ्यंतरविद्रधीन् वीरतरुसहचरद्वयदर्भवृक्षादनीगुंद्रानलकुशकाशाश्मभेदकाग्निमंथमोरटाकररि भल्लूककुरंटिकेंदीवरक
पोतवंकाश्वदंष्ट्रा चेति वीरतर्वादिरित्येषगणो वातविकारनुत् अश्मरीशर्कराकृच्छ्राघातरुजापहः रोध्रसावररोध्रप
लाशकुटन्नटाशोकफलैलवालुकसल्लकीजिंगिणीकदंबशालकदली चेति एषरोध्रादिरित्युक्तो मेदःकफहरो गणः योनि
दोषहरस्तंभीवर्ण्यो विषविनाशनः अर्कालर्ककरंजद्वयनागदंतीचित्रकमयूरकभार्गीरास्नाइंद्रपुष्पीक्षुद्रश्वेतामहाश्वेताव
श्चिकालीअलवणातापसवृक्षाश्चेति अर्कादिको गणो ह्येष कफमेदोविषापहः कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः

शोधनः॥ सुरसादिर्गणो श्लेष्मकफहृत्कृमिसूदनः प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः॥ मुष्ककपलाशधवचित्रकमदनवृक्षक
शिंशिपावज्रवृक्षास्त्रिफला चेति॥ मुष्ककादिर्गणो हन्ति मेदोघ्नः शुक्रदोषहा॥ मेहार्शःपांडुरोगाश्मशर्कराश्मरिनाशनः॥ पिप्पलीपिप्पलीमू
लचव्यचित्रकशृंगवेरमरिचहस्तिपिप्पलीरेणुकाएलाजमोदेंद्रयवपाठाजीरकसर्षपमहानिंबफलहिंगुभार्ङ्गीमधुरसातिविषावचा
विडंगानि कटुरोहिणी चेति॥ पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचिः॥ निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः॥ एलातगरकुष्टमांसी
ध्यामकत्वक्पत्रनागपुष्पप्रियंगुहरेणुकाव्याघ्रनखशुक्तिचंडास्थौणेयकश्रीवेष्टकचोचचोरकवालुकगुग्गुलुसर्जरसतुरुष्ककुंदुरु
कागरुस्पृक्कोशीरभद्रदारुकुंकुमानि पुन्नागकेसरं चेति॥ एलादिको वातकफौ निहन्याद्विषमेव च॥ वर्णप्रसादनः कंडूपिटकाकोष्टनाश
नः॥ वचामुस्तातिविषाभयाभद्रदारूनागकेसरं चेति॥ हरिद्रादारुहरिद्राकलसीकुटजबीजानि मधुकं चेति॥ एतौ वचाहरिद्रादिगणौ स्तन्यवि
शोधनौ॥ आमातीसारशमनौ विशेषाद्दोषपाचनौ॥ श्यामामहाश्यामात्रिवृद्दंतीशंखिनीतिल्वककंपिल्लकरम्यकक्रमुकपुत्रश्रेणी
गवाक्षीराजवृक्षकरंजद्वयगुडूचीसप्तलाछगलांत्रीसुधासुवर्णक्षीरी चेति॥ श्यामादिर्हंति गुल्मविषारोचकहृद्रुजः॥ आनाहोदरविड्
भेदीत थोदावर्तनाशनः॥ बृहतीकंटकारिकाकुटजफलपाठामधुकं चेति॥ पाचनीयो बृहत्यादिर्गणः पित्तानिलापहः॥ कफारोचकहृद्रो
गमूत्रकृच्छ्रविनाशनः॥ पटोलचंदनकुचंदनमूर्वागुडूचीपाठाकटुरोहिणी चेति॥ पटोलादिर्गणः पित्तकफारोचकनाशनः॥ ज्वरोपशम
नो व्रण्यश्छर्दिकंडूविषापहः॥ काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदामहामेदाछिन्नरुहाकर्कटशृंगीतुगा

द्वितीय ... ४ ... ४ ... ४ ... ५ ... ५

क्षीरीपद्मकप्रपौंडरीकमृद्धी का ऋद्धिवृद्धिजीवं सोमधुकं चेति। काकोल्यादिरयं पित्तशोणितानिलनाशनः जीवनो बृंहणो वृष्यस्तन्यश्लेष्म
करस्तथा। ऊषकसैंधवशिलाजतुगुग्गुलकासीसद्वयहिंगूनि तुत्थकं चेति। ऊषकादिः कफं हंति गणो मेदोविशोषणः अश्मरीशर्करामूत्रकृच्छ्र
गुल्मविनाशनः। सारिवामधुकचंदनपद्मककाश्मरीफलमधूकपुष्पाण्युशीरं चेति। सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः। मधुकं चेति। अं
जनादिगणो ह्येष रक्तपित्तनिबर्हणः। विषोपशमनो दाहं निहंत्याभ्यंतरं तथा। परूषकद्राक्षाकट्फलदाडिमराजादनकतकफलशाकफलानि त्रिफ
ला चेति। परूषकादिरित्येष गणोऽनिलविनाशनः। मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः। प्रियंगुधातकीपुन्नागनागपुष्पचंदनकुचंदनमो
चरसरसांजनकुंभीकास्रोतोंजनपद्मकेसरयोजनवल्लीदीर्घमूला चेति। अंबष्ठाधातकीकुसुमसमंगाकट्वंगमधुकबिल्वपेशिकारोध्रसा
वररोध्रपलाशनंदीवृक्षपद्मकेसराणीति। गणौ प्रियंग्वंबष्ठादी पक्वातीसारनाशनौ। संधानीयौ हितौ पित्ते व्रणानां चापि रोपणौ। न्यग्रोधो
दुंबराश्वत्थप्लक्षमधुककपीतनककुभाम्रकोशाम्रचोरकपत्रजंबूद्वयपियालमधुकरोहिणीवंजुलकदंबबदरीतिंदुकीसल्लकीरोध्रसावररोध्रभल्लातक
छर्दिपिपासादाहनाशनः। उत्पलरक्तोत्पलकुमुदसौगंधिककुवलयपुंडरीकाणि मधुकं चेति। उत्पलादिरयं दाहरक्तपित्तविनाशनः। पि
पासाविषहृद्रोगछर्दिमूर्छाहरो गणः। मुस्ताहरिद्रादारुहरिद्राहरीतक्यामलकविभीतककुष्ठहैमवतीपाठाकटुरोहिणीशार्ङ्गेष्टातिविषा
द्रविडीभल्लातकानि चित्रकश्चेति एष मुस्तादिको नाम्ना गणः श्लेष्मनिषूदनः। योनिदोषहरः स्तन्यशोधनः पाचनस्तथा। हरीतक्यामलकविभि
तकानि त्रिफला। त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशिनी चक्षुष्या दीपनी चैव विषमज्वरनाशिनी। पिप्पलीमरिचशृंगवेराणि त्रि

गुडूचीनिंबकुस्तुंबुरुचंदनपद्मकं चेति एषः सर्व बेतस ५ वचा ३ मजीठा ३
ज्वरान् हंति गुडूच्यादिस्तु दीपनः ... जोसारोच
कछर्दि पिपासा दाहनाशन ४ त्रुटि

आख्यासुप्रामः।।ग मदनकुटजजीमूतकेक्ष्वाकुयामार्गवृषिष्ठकृतवेधनसर्षपविडंगपिप्पलीकरंजप्रपुन्नाटकोविदारकर्बुदारारिष्टाश्व
गंधाविदुलबंधुजीवकश्वेतासणपुष्पीबिंबीवचामृगेर्वारुचित्रामधूकविषाणिकाप्रियंगुलवणरसाजंनीकेस्तुही पयस्यावेल्लुकानाण
हराणि तत्र कोविदारकर्बुदाराणां फलानि कोविदारादीनां मूलानि प्रियंग्वादीनां पुष्पपत्रनिर्यासक्षीराणीति त्वक्तत्तपामार्गं तीक्ष्णवेत्तीसप्तला
शंखिनीविषाणिकागवाक्षीगिलोत्रीक्षुकसुवर्णक्षीरीचित्रकंकिणिहीकुशकाशशालितिल्वककंपिल्लकरम्यकपाटलापूगत्रिफलानि
लिनीबकरंगुलैरंडदंतीकंमद्राक्षासप्तच्छदार्कज्योतिष्मतीचोमार्गहराणि तत्र तिल्वककृतवेधनमूलानि तिल्वकादीनां पाटलांतानां त्व
चः कंपिल्लकादीनां फलरज इति फलादीनामेरंडांतानां फलानि दंतीकारग्वधयोः पत्रं शेषाणां क्षीराणि कोशातकीसप्तलाशंखिनीदेवद
लीकारवेल्लिकानेत्रु नयतो मार्गहराणि एषां स्वरसा इति। पिप्पलीविडंगापामार्गशिग्रुसिद्धार्थकशिरीषमरिचकरवीरबिंबीगिरिकर्णि
काकिणिहीकाज्योतिष्मतीकरंजार्कालर्कलशुनातिविषाशृंगवेरतालीसतमालसुरसार्जकेंगुदीमेषशृंगीमातुलुंगीमुरंगीपीलुजा
तीशालतालमधूकलाक्षाहिंगुलवणमद्यगोसक्वदसमूत्राणि निशिरोविरेचनानि। तत्र करवीराणि फलानि करवीरादीनां मर्कतानां
मूलानि तालीसचूर्णानि। ... मेषशृंग्योः त्वचौ मातुलुंगीमुरंगीपीलुजातीनां पुष्पाणि शा
लतालमधूकादीनां साराः हिंगुलाक्षे निर्यासौ लवणानि पार्थिवविशेषाः। मद्यान्यासवसंयोगाः। गोमूत्रसदृक्दसोमलविन्नि। शोधनमना
त ऊर्ध्वं स्यामः। भद्रदारुकुष्ठहरिद्रावरुणमेषशृंगीबलातिबलार्कशुद्धगजनसल्लकिकुबेराक्षीवीरतरुसहदेवरामिमंथवत्साद

राम ७१

कटुकंत्र्यूषणंकफमेदोघ्नंमेहकुष्ठत्वगामयान्‌।निहन्याद्दीपनंगुल्मपीनसाग्न्यल्पतामपि॥आमलकंहरीतकीपिप्पलीचित्रकश्चेतिस्त्र्या
मलक्यादिरिमोगणःसर्वज्वरापहः॥चक्षुष्योदीपनोवृष्यःकफारोचकनाशनः॥त्रपुसीसताम्ररजतकृष्णलोहसुवर्णरीसोलोहमलाश्चे
तिगणस्त्रप्वादिरित्येषगरकृमिहरःपरः॥पिपासाविषहृद्रोगपाण्डुमेहहरस्तथा॥लाक्षारेवतककुटजाश्वमारककट्फलहरिद्राद्वयनिंबस
प्तच्छदमालत्यस्त्रिफलाचेतिगणः॥कषायमधुरकफपित्तार्त्तिनाशनः॥कुष्ठकृमिहरश्चैषदुष्टव्रणविशोधनः॥एभिर्लेपांश्चतैलांश्चसर्पींषिच
पानकान्‌।नानाप्रयाविकल्पांश्चतानपिचकारयेत्‌॥पंचमूलान्यतऊर्ध्वंवक्ष्यामस्तत्रत्रिकंटकोबृहतीद्वयपृथक्पर्णीविदारिगंधाचेति
कनीयः॥कषायतिक्तमधुरंकनीयःपंचमूलकं।वातपित्तोपशमनंबृंहणंबलवर्द्धनं॥बिल्वाग्निमंथटिंटुकपाटलाकाश्मर्यो महत्‌।सतिक्तं
कफवातघ्नंपाकेलघ्वग्निदीपनंमधुरानुरसंचैवपंचमूलंमहत्स्मृतं।गणःश्वासहरोह्येषकफपित्तानिलापहः॥आमस्यपाचनश्चैवसर्व
ज्वरविनाशनः॥विदारीसारिवाद्वयगुडूचीअजशृंगादिकरमर्दीत्रिकंटकसैरेयकशतावरीगृध्रनखीइतिकंटकसंज्ञौरक्तपित्तहरौह्येतौशो
फत्रयविनाशनौसर्वमेहहरौचैवशुक्रदोषविषापहौ॥कुशकाशनलदर्भकांडेक्षुकइतितृणसंज्ञः॥मूत्रदोषविकारंचरक्तपित्तंतथैवचअं
त्यःप्रयुक्तःक्षीरेणशीघ्रमेवविनाशयेत्‌॥त्रिवृतादीनितूपरिवक्ष्यामः॥समासेनगणाह्येतेप्रोक्तास्तेषांचविस्तरं॥चिकित्सितेषुवक्ष्यामिज्ञा
त्वादोषबलाबलंसूक्ष्मवर्षाणितिलशोऽपिसर्वज्ञेषुनभिन्नतायाहृपितामहेनाप्याविधिनौषधसंग्रहःसमासाद्दोषभेदांश्चगत्वाचाभिप्रायाच्चयो
जयेत्पृथग्मिश्रान्समस्तान्वागणंवाव्यस्तसंहतान्‌।इतिसौश्रुतेसूत्रस्थानेअष्टत्रिंशोध्यायः॥॥अथातःशोधनशमनीयमध्यायं

१

गुडूच्यरिष्टत्रिफलारसेन मव्योषमूलं कफजे पिबेत्सा। त्रिवर्णकाश्रूषणयुक्तमेतत् गुडेन लिह्यात् प्रतिकृत्य चूर्णं प्रस्थेच तन्मूलरसैस्तु
दत्वा तन्मूलकल्कं वरणप्रमाणं। कर्षोन्मितेसैंधवनागरेस्त्व विपाच्यकल्की कृतमेतदरघात। तत्कल्कभागः समहेमघ्नाशोषः सर्वसैंधवोष्णु
त्रपुतस्थ्येपेयः समास्त्वक्नागरकाम्लमास्तु आगार्द्रकपूगफलं सुपक्वं विडंगमारोभारिवेसदारुयोगः समिश्रेत्सवस्त्र चतुःसमःः विरेचनद्रव्ये
भवं तु चूर्णं रसेन तेषाम तितक्तिमृघ। तन्मूलसिद्धेन च सर्पिषा कंसे व्यतरा ह्येषु टिकीकृतं वा। गुडेन पाकाभिमुखेनि बायच्चूर्णं कृतं सम्
म्यग्दिविपाच्यं शीतं त्रिजातात्र्समन्वो विमृघ योगान्तु रूपावटकाप्युयो ऽपारसेन तेषा परिमाव्यतुज्ञान् मूषः सासिंकजं च सर्पिरिष्टः। विरेचनोल्पे
रपि वैदलैः स्याद्द्रवं विदध्याद्रुमनोषधेस्थ। क्षुदे तोः परिलिप्य कल्के त्रिमंडिजातेः प्रतिवध्य पक्वा पक्वे वसम्यक्पुटपाकमुक्तः स्वादेत्तु तं
पित्तगदी सु शीते। सितात्रगंधा त्वकुली रशृंगी विदूता समाः। लिह्यात घृतेन मधुना तु तद्द्दाहज्वरघ्नान्तयेऽपि। शर्करा ह्ये संयुक्तं त्वद्वृ
लीवदूर्णितं सुकुमाराणां। त्रकूप लमरिवोवीकं। पवेद्धेहं सिता सौद्र पला ई कुडुवान्वितं। तद्वृचूर्णयुतं शीतं पित्तघ्नं तद्विरेचनं। त्वक्
त्र्यपामोद्गारमुठी पिप्पली मधुना सह। सर्वश्लेष्मविकाराणां श्रेष्ठमेतद्विरेचनं। बीजाध्यपथ्या कान्तमर्द्धधात्री दाडिमकोलजातं तै
लभ्रष्टात्रोसा न त्रफलैः ध्येन घनीभूतं तु सौ गंधविद्वृत्सौद्रसमन्वितं लेहमेतत्कफप्रायैः सुकुमारैर्विरेदनं। नीलीतुल्यं
लगेलं च तैस्त्वटुल्वसलिले पलातु चूर्णं संतर्पणं त्रौदफलाम्लं सन्निपातजित्। त्वद्वृतरपामासितात्तमलात्रिफलामाक्षिकैः समैः। मोदकः
सन्निपातोर्ध्वरक्तपित्तज्वरापहाः। त्वद्वृभाग त्रयः पोक्तास्त फलातल्समातया। त्वारह्न स्वादिडंगानि सं चूर्णं मधुनासर्पिषा लिह्यात् गुडे

सुमनचूर्णं वा पूर्ववद्देवदालीरसे निचुलेषु क्षीरयवागूं रोमशेषु संतानिकादधिमुत्तरे हरितपाण्डुषु तक्रमपय संसृष्टं वा सुराकाकारो
ल्वककासश्वासपाण्डुरोगयक्ष्मसु प्रयोगस्तेषु मदनफलमज्जवदुपयोगः तथा कुटजफलविधानं कृतवेधनानामप्येष एव कल्पः
विशेषतस्तु पित्तश्लेष्मणि कुटजफलमुक्तं। इक्ष्वाकुकुसुमचूर्णं वा पूर्ववद्देवदालीरसे कासश्वासच्छर्दिकफरोगेषु प्रयोज्यं मार्गव
स्यापि मदनफलमज्जवदुपयोगः। विशेषतस्तु गरगुल्मामयेवा यो वा कफस्थानगतेषु कृतवेधनपिप्पलीनां वमनद्रव्यकषायपरिपी
तानां वस्त्राः चूर्णस्तु स्यादिक्षुरसेन माध्यातेवा समस्त्रिदोषेषु यवागूमाकेशीतवन्तु वा विदध्यात्। वमनविरेचनशिरोविरेचनद्रव्या
णि यथानतमानि नवं निम्बवमनद्रव्ययोगाणां दिशि येन सम्यक् ... तानामधिक्ष्य यथा आधिकालनिश्चयशक्तितः मात्रगस्थैव स्तु तस्य
दोषस्य समुदीरणं। को हि संबोधयेत्सुप्तं सिंहं गिरिगुहाशयं तस्मात्संशोधनं स्वस्थस्य कायेन परिवर्जयेत् हीने दोषप्रकोपेन किंचित्सं
शोधनेन च। षण्मासात्तु कृते यस्तु वमनं सविरेचनं। नतस्मात्क्रमते व्याधिः सर्वरोगैः प्रमुच्यते। कषायैः स्वरसैः कल्कैः चूर्णैः रादिवद्बुद्धि
मान् पयलेह्यादियोगेषु वमनास्तु प्रकल्पयेत्॥ ॥इति सौश्रुते सूत्रस्थाने वमनद्रव्यविकल्पनिरो ध्यायः॥ ॥अथातो विरेचनद्रव्यविकल्पविज्ञानी
यमध्यायं व्याख्यास्यामः॥ ॥अरुणाभं त्रिवृन्मूलं श्रेष्ठं मूलविरेचने। प्रधानं तिल्वकः त्वक्षु कफघले स्वपि हरीतकी तैले स्वेरण्डजं तैलं
स्वरसे कारवेल्लिका। सुधापयः पयस्सु क्षुरतिमागम्यसंग्रहः। तेषां विधानं वक्ष्यामि यथावदनुपूर्वशः वैरेचनद्व्यरसानु पीत्वा मूलम
हत्रैव तमस्ता दोषं चूर्णीकृतं सैन्धवनागरांशमक्षैः पिबेत्सारुतरोगस्तु पूः। इत्यो विकारैमधुरैरसैस्तु पैत्ते गदे क्षीरयुतं पिबेद्दा

पर्वे१ पत्त्याह्न

पष्ठकुल्तरसक्षौपञ्चकालिम मधुरसवत्सर्युक्तां अपत्तिसानिच्छ्रदनशलाटुचूर्णं सिद्धांवी२
पर्वज३

अपामार्ग — क्वाथफल१

चूर्णं प्रकुंचं प्रत्यक्पुष्पीनिंबकषायाणामन्यतमेनोष्णेनालोड्य मधुसैंधवयुक्तां मात्रां पाययित्वा वामयेत्। मदनशलाटुचूर्णं त्रि
वृ॰ वातितिलतंडुलयवागूं निर्दग्धां नातिहरितपांडूनां कुटजमूलानां वा ... यप्रलिप्तानां यवतुषमाषशाल्यादिधान्यराशौ
... रात्रोषितं ... भिन्नानां फलानां कुलां पिप्पलीरूक्षमालये ... षयेत् तासां ... दितात पथ्यक्काणां सुमाजनस्यानां ... तत्र
... षष्ठी ... यष्टीमधुकषाये कोविदाराढकीनामन्यतमेवा ... षाये विमृज्य रात्रिपर्युषितं मधुसैंधवयुक्तं मात्रां भिरभिनंदितं ...
सुखःप्राङ्मुखं मातुरं पाययेत् ... तत्र ... अनेन मंत्रेणाभिमंत्र्य ब्रह्मदक्षाश्विरुद्रेंद्रभूचंद्रार्कानिलानलाः ऋषयः सौषधीग्रामा
भूतसंघाश्च पांतु वः रसायनमिव र्षीणाममराणाममृतं सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते विशेषेण श्लेष्मज्वरप्रतिश्याय
... मानेवर्त्ते पिप्पलीवचागौरसर्षपकल्कोन्मिश्रं सलवणैः उष्णांबुभिः पुनरप्रवर्त्तयेत् यदा सम्यग्वांतलक्षणं म
दनफलचूर्णं तत्क्काथपरिभावितं वमनद्रव्यकषायेण मदनफलमज्जसिद्धस्य वा पयसा संतानिकां ... पयवापूमयो भागास्त
... हृद्याहृद्याः मदनफलमज्जसिद्धस्य वा पयसि दधि भाव मुपगतस्य दधुत्तरं दधि वा कफप्रसेक छर्दिप्र ... तमकेषु। मदन
फलमज्जरसं ... संप्रह्रुं वा ... लातकवत्स्नेहमादाय काणितीकृतं लेहयेत् ... प्परिशुष्कं वा मदनफलमज्जचूर्णं जीवंतीकषा
येण ... त्रेकफस्थानगतेमदनमूलमज्जक्वाथं वा पिप्पल्यादिप्रतीवापं कषायपोरन्यतरेण संतर्पणं कार्यं कफसंव्याधिहरं म
दनफलमज्जचूर्णं वा मधुकपुष्पद्राक्षाकाश्मर्यकषायेण कफस्थानगते। अयोगमेनरक्तपित्ते मदनफलविधानमुक्तं जीमूतकु ७६

तस्यस्नेहलिह्या मत्त३ ... दन्त्यादि धनि१ ... देवमीली२

मदार
एत द्वार्गनिबंध ... मरि२

राम

साठि१

सा छी

राष्ट्रा३
मदनफला
वी ग ३

वेतसम्लतक्रदधिसुक्तसुराचुक्रसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः। सैंधवसौवर्चलविडपांशुरोमक
पक्त्रिमयवक्षारोषरसुवर्चिकाप्रभृतीनि समासेन लवणो वर्गः॥ पिप्पल्यादिसुरसादिशिग्रुमूलकलशुनसुमुखशीतशिवा
कुष्ठदेवदारुहरेणुकावल्गुजफलचंडागुग्गुलुमुस्तालांगलकीशुकनासापीलुप्रभृतीनि सालसारादिश्च प्रायशः कटुको वर्गः।
आरग्वधादिर्गुडूच्यादिर्मंडूकपर्णीवेत्रकरीरहरिद्राद्वयेंद्रयववरुणस्वादुकंटकसप्तपर्णबृहतीद्वयशंखिनीद्रवंतीत्रि
वृत्कृतवेधनकर्कोटककारवेल्लवार्ताककरीरकरवीरसुमनःशंखपुष्प्यपामार्गत्रायमाणाशोकरोहिणीज
यंतीकर्कोटकसुवर्चलापुनर्नवावृश्चिकालीज्योतिष्मतीप्रभृतीनि समासेन तिक्तो वर्गः। न्यग्रोधादिरंबष्ठादिः प्रियंग्वादी रोध्रादिस्त्रि
फलासल्लकीजंब्वाम्रबकुलतिंदुकफलानि कतकशाकफलपाषाणभेदकवनस्पतिफलानि सालसारादिश्च प्रायशः
कुरुवककोविदारजीवंतीचिल्लीपालंक्यासुनिषण्णकप्रभृतीनि वरकादयो मुद्गादयश्च समासेन कषायो वर्गः। तत्रैषां र
सानां संयोगास्त्रिषष्टिर्भवंति तद्यथा पंचदश द्विकाः विंशतिस्त्रिकाः पंचदश चतुष्काः षट् पंचकाः एकः षट्कः एकशः षड्र
साः इति त्रिषष्टिः तेषामन्यत्र प्रयोजनाद्विवक्ष्यामः। भवति चात्र। जंघाः षडुपिग्छतिवलिनो वरपतोरसाः यथादोषाभिकु
पिताः वशं यांति बलीयसः॥ ॥ इति सौश्रुते सूत्रस्थाने द्विचत्वारिंशोध्यायः॥ ॥ अथातो वमनद्रव्यविधिकल्पविज्ञानीय
मध्यायं व्याख्यास्यामः। वमनद्रव्याणां फलादीनि मदनफलानि श्रेष्ठतमानि भवंति। अथ मदनपुष्पाणि मातपपरिशुष्काणि

११ ःप्रमेहे १ जैपाल दंती २ नीलसुधलन २ मूलानि २

पूराणि ५

गर्थाद्भित्विपमरहीतं ९ नीलतोयं ३ मातुलाजी ५

तुषाबुसौ वीरि २ वमुसेत्। ज्ञात्वा जातरसं चापि तत्तुषोदकमादिशेत्। तुषांबु सौवीरकं यो ध्विविरेषु प्रकीर्तितः। षड्रात्रात्सप्तरात्राद्वा तेन वयेयेयप्रकी
र्तितैः वैरवनेषु तद्वेषु तद्वन्मूलविधिः स्मृतः। दंतीद्रवंतीमूलानि विचूर्णयात्सकुशांतूर्णं पिप्पलीक्षौद्रयुक्तानि लिह्यात्त्रीन्मधुरसजो
पयेत्तं तत्त्रिवृद्धिधानेन योजयेत्। श्लेष्मपित्तमोः कल्ककषायाम्भांसि वक्रीत्वेवं विपाकमेसर्पिश्चापक्वं विसर्पकढ्हकद्रुलजं जनयेत। कुष्ठ ४
मेहगुल्मानिलश्लेष्मश्विंयाश्लेलमेवच। वातैः मेदसंक्षत शुक्रवातसंरोध जारूजं दंती द्रवंतीमरिचकनकाकाथे वासकेः। विषघ्ने
कुष्ठ ५ पञ्चमूलकाकवित्रकैमूत्रजाविते। सम्पाकसर्पिषा चूर्णं योज्यमेतद्विरेचनं। जीर्णे संतर्पणं क्षौद्र पित्तश्लेष्मरुजापहं च जीर्णे पाश्वरु
कूपांडुप्लीहोदरनिवर्हणं। गुडस्याष्टपलं पथ्या विंशतिः स्यात्पलं पलं दंतीचित्रकयोः कर्षौ पिप्पलीत्रिवृतोर्दश। कृत्वेतान्मोदका
न्कर्षं त्राम्य हनिततः। तदेतदुष्णतोयम्ने बीजितश्चामल्लिमे। दोषप्रायहल्लीपांडुरोगार्शः कुष्ठनाशनाः। मोदकं त्रिजातकमुस्ता विडंगामलके
तथा। नवैतानि समांशानि त्रिवृद्दशगुणा भवेत्। मधुसमचूर्णिता नीहृदंती भागद्वयं तथा षट्त्रिंश शर्कराभागैश्चत्वारिंशग्रमाद्रिके। पिंडिते
मत्स्यपित्वानु ततः शीतांबुपाययेत्। वह्निरुक्शूलज्वरच्छर्दिशोषपांडुश्रमापहं। निर्यंत्रणमिदं साविविषघ्नं तु विरेचनं। त्रिवृत्कष्टकसं
तोयं प्रशस्तः पित्तरोगिणां। मद्यक्षीरानुपानैर्वा पित्तश्लेष्मातुरैर्नरैः। मद्यरूपसधर्मत्वात् श्रेष्ठे सेव विधीयते। तिल्वकस्य त्वचं वा
मेतत्वल्कविवर्जितां। चूर्णं पित्वाद्गुलोभागो तत्कषायेण गालयेत्। तत्तीयपावितेनेनभागोस्तु द्रुतुमावितं। दशमूलीकषायेण त्वदे राम ७८
दत्तं प्रयोजयेत्। हरीतक्याः फलं त्वस्थिविशुष्कं दोषवर्जितं योज्यं विरेचिधानेन सर्वव्याधिनिवर्हणं रसायने परं सेव्यं दुष्टानेव

रावं ३ रसविधिे ५

भारस्वधादि ६

नगुटिका घृत्वा वा प्यथ मन्त्रयेत् कफवातगुल्मान् प्लीहोदर हलीमकान् हंत्यन्यानपि वाप्येत त्रिवृत्पायं विरेचनं । चूर्णं त्रिपामात्र हरि
लीकट्वीमुस्तकदुरालभा । वचेंद्रवीज त्रिफलासर्पिर्मांसरसांबुभिः पीतं विरेचनं नद्धिकृत्स्नाण मपिरास्य तैर्विरेचनिकं भिक्काथ्य भागाच्ची
ताश्चयोमताः द्वौ फाणितस्य तच्चापि पिष्ट्वा रयावच्छिश्रयेत् तेम्यस्तुमिद्धं विज्ञाय शीतं कृत्वा निचापयेत् कलसे हत संस्कारे विनत्यत्र हिमाहि
मौमासाद्धं जातरसंमासवेमद्यं गंधिकं । पिबेद्रसावेव विधिस्तारस्त्रासवे घपि वैरेचनिकमूलानां क्काथ्य माषांस्तु भावितांस्तु शौनात्वं
कषायेण शालीनां वापि तंडुलान् । अवक्षुद्यैकतः पिंडान् कृत्वा शुष्कान्सु चूर्णितान् शालितंडुलचूर्णं च तत्कषाययोष्मसाधितं तस्य पि
ष्टस्य भागान् द्वौ च किण्वं भागविमिश्रितात् । मंडोदकार्थं क्काथं च तु घातत्सर्वमेकतः निदध्यात्कलशे तांतु संज्ञातां सुसुरां पिबेत् । एवम
वसुराकल्पो वमनेष्वपि किर्तितः मूलानि त्रिवृतादीनां प्रथमस्य गणस्य च । महतः पंचमूलस्य पूर्वाचार्द्धं इ द्वयोरपि सुनांहि मवतं
वै वा त्रिफलाविभिश्रवा सहसैतानि भागौ द्वौ कारयेद्दकमेतयोः कुर्यात्क्काथ्य मेकं स्मिन्नेव तस्मिन्चूर्णमेवं च ... स्मिन्नपि
क्काथ्येभावयेत् च कृत्वा ... क्काथं मृद्वन्यानां तेषां भागत्रयो मताः चतुर्थं भाग मावाप्य चूर्णं नाम तत्र कीर्तितं प्रक्षिप्य कलशे
सम्यक् समस्तं तद्दनंतरं तेषामेव कषायेण शीतलेन प्रयोजितं पूर्ववत्संश्रितं दध्यात् सततं पंचसौवारकं हितं । पूर्वोक्तं वर्गमाहत्य द्वियाद्ध
लैकमेतयोः भागसंहत्य संघृष्य यवान्स्यात्यामदि श्रयेत् च कृत्वा गपाक षायेण नमभिषिंच्य सा धयेत् । सुसिद्धं श्रावतन्यैतान्दोष
द्धीन्वो पिबेद्वैपतं । विमर्दस्तनुषांस्तस्य कृत्वा न स्नात पूर्ववच्छिताच्च पर्वो क्तौ षष्ठ भागस्य चूर्णं दत्वान् पूर्ववत् । तेनैव सहपेण ॥ पूर्वेरापूर्व

शीर्ष ... तवान् २ माधीर्णपतिर २ ... स्वीकीर्यं ३ कोंजी वत्स

१२ २०६१

तदंगारैर्विनोषितं। अम्लादिभिः सर्वविलीयु[illegible]कालु संमितं। महाद्रव्यपयः पीतैयवाग्रस्तं दुलैकृतं। पीता विरेचयत्याशु मुद्गौल्लिका
रिकाहतानि हुवेवा साध्रितः समक्रम्नुही क्षीरभावितं प्टतेः। भावितास्नुसुही क्षीरे पिप्पल्यो मरिचानि च। ताः चूर्णं कांपिल्लकं वापि तत्पीतं तद्युटि
कान्वितं। मसूलाद्यं खिनी दंती त्वक्सारग्ध योगवो। मूत्रेणाद्यासमाहत्सुही क्षीरे ततः परं। कीर्णं तेनैव चूर्णे नमाल्यं वसतमेववा।।
आप्रायाद्दर्भसौम्पिकुष्माण्डकोष्टीविरीच्यते। क्षीरत्वक्फलमूलानां विधानैः परिकीर्तितैः। सिंहादेरण्डतैलेन कुष्ठं त्रिकटुकं युतं।
सुखोरकं वा पिबेयोगो विरेचयेत्। अवेक्ष्यमम्प्ययोगादीन् यथावदुपयोजयेत्। सिताजगंधा चक्रक्षीरी विदारी त्रिवृता समा मूलि
सान्नमधुसर्पिष्मांत्नद्रदाहज्वरशांतये। शर्करा क्षौद्रसंयुक्तं त्रिवृच्चूर्णं वचूर्णितं। गोधनं स्तुकुमाराणां त्वक्पत्रमरिचांशकं यवक्षारं
मराक्षौद्रफलाद्वकटुकान्वितं। त्रिवृच्चूर्णयुतं शीतं पित्तघ्नं तद्विरेचनं। त्रिवृत्तृणामा सिता सिद्धः वत्तम्रः त्रिफलात्वक् विडंगं पिप्पली
क्षारं त्वाणलिप्तमधुचूर्णितः। लिहान्सर्पिर्मधुन्माववमोदकं वा गुडेन वा भक्षयेत्। परीहारं मेतत्सृष्टः विरेचनं गुल्मप्लीहोदरकु
संहलीमकमरोचकं। कफवातव्रुता शाम्यार्त्थाधीनेन घपो हन्ति। घृतेषु तैलेषु पयस्सु वापि मधुषु मूत्रेषु तथा रसेषु भक्ताद्यपाने
षुवलेषु तेषु विरेचनाद्युपमतिर्विदध्यात्। क्षीरं रसं कल्कम थो कषायं सृतं च शीतं च तथैव चूर्णं कल्पाः षडेते खलु भेषजानां यथो
त्तरं तेल घवः परिष्टाः।। ।। इति सौश्रुते सूत्रस्थाने चतुःचत्वारिंशोऽध्यायः।। ।। अथातो द्रव्यविधानीयमध्यायं व्याख्यास्या राम
मः।। ।।पानीयमौतरिक्षमनिर्देश्यरसममृतं जीवनं तर्पणं धारणमाश्वासजननं श्रमक्लमपिपासामदमूर्च्छातंद्रानिद्रादाहप ७८

टी.मी.साग

रोचनं। हरीतकी विडंगानि सैंधवं नागरं त्रिवृत् मरिचानि च तत्सर्वं गोमूत्रेण विरेचनं। हरीतकी त्रिवृद्दन्ती कुष्ठं युगफलं तथा सैंध
वं शृंगवेरं च गोमूत्रेण विरेचयेत्॥ नीलिनीफलचूर्णं तु नागरामयपथ्योत्तमपालीह्रु गुडेन सलिलं पश्चादुष्णं पिबेन्नरः। पिप्पल्यादि
कषायेण पिबेत् पिष्ट्वा हरीतकीं सैंधवोपहिताः सर्वे भूषयोगो विरिच्यते हरीतकीमत्स्यमाणा नागरेण गुडेन वा सैंधवोपहिता वापि
भवत्येषाग्निदीपनी। वातानुलोमनी हृद्या चेंद्रियाणां प्रसादिनी। संतर्पणकृतानां रोगानां प्रायो हरत्याद्ध हरीतकीचूर्णमामलकैरुत्तेपि
त्रमेहः कुष्ठापहं। विभीतकमज्जत्वं वकफपित्तनिवर्हणं। त्रीण्येव म्लकषायाणि सन्ति कमधुराणि च त्रिफला सर्वरोगघ्नी त्रिनाम दू
मेत्सीद तमूर्छिता वयसः स्थापने चापि दुर्मार्ष्वन् सेविता। हरितकीविधानेन फलान्येवं प्रयोजयेत् विरेचनीयानि सर्वाणि विशेषाच्चतुरं
चक्रदत्त गुलानि फलेकाले समुद्धृत्य सिकतायां निधापयेत्। समाहिमानये युक्ततो मज्जानमुद्धरेत्। तैलं या घं जलेपकं तिलवद्विल्यपी ति
वातस्योपयोगो बालानां यावद्वर्षाणि द्वादश। लिहादेरंडतैलं मकुष्ठं त्रिकटुकान्वितं। सुखोष्णेनांबुना पिबेद्घयोगो विरेचयेत्। एरं
डतैलं त्रिफलाक्वाथेन द्विगुणेन तु युक्तं पीतं मध्यक्षीररसाभ्यां तु विरेचयेत्। बालवृद्धक्षतक्षीणसुकुमारेषु योजितं। फलाम्लादि
भिरुद्दिष्टक्षीराणामेणु श्रुतं। विरेचनानां नीतिस्तानामपमयोगो परेस्मृतं। मृदुकोष्ठे निशोथचूर्णेन क्षीणानां नियोजयेत् पाययेदु
रेरगुल्मे शोफपांडामयेगरेषु युंजीत त्वग्वा क्षीरं भूपे मांसरसे [illegible] ते। अन्नसंयुक्तेन दंतीविषवल्लमीविभ्रमाते विज्ञानतो प्रयुक्ते तु पि
महोत्तमप्रिसंचये। भिन्नसान्ये दोषाणां रोगान् हेतिवदुत्तरान्। महत्त्वाः पंचमूल्या तु दृढ हस्तो भयकराः। पथ्यं भू पथ्यं भूकषायमागव

वेति कीटमूत्रपुरीषांडशावकोथप्रदूषितं। तृणपर्णोत्करयुतं कलुषं विषसंयुतं। योवगाहति वर्षासु पिबेद्वापि नवं जलं। स बाह्याभ्यं

दुष्टविधा तुल्य तरान् रोगान् प्राप्नुयात् क्षिप्रमेव तु। तत्र पंकशैवलकुमुदपत्रप्रभृतिभिश्छन्नं शशिसूर्यानिलैर्नाभिजुष्टं गंधवर्णरसोपसृ

ष्टं वा तदापन्नं विद्यात्। तस्य स्पर्शरसरूपगंधवीर्यविपाकदोषाः षट् संभवंति। तत्र खरता पैच्छिल्यमौष्ण्यं दंतग्राहिता च स्पर्शदोषः। पंक

सिकताशैवलबहुवर्णता रूपदोषः। अनिष्टगंधता गंधदोषः। व्यक्तरसता रसदोषः। यदुपयुक्तं तृष्णागौरवशूलकफप्रसेकानापादयति स पंक्तिविना ५

वीर्यदोषः। यदुपयुक्तं चिराद्विपच्यते विष्टंभयति वा स विपाकदोषः। एते आंतरिक्षे न संभवंति। आपन्नमुदकं यस्तु पिबति ह्यप्रसाधितं श्वयथु

पांडुरोगं त्वग्दोषमविपाकितां श्वासकासप्रतिश्यायशूलगुल्मोदराणि वच्चन्यानि तेन विषमयोगव्याध्युपादविरेणसः। सदा कलुषप्रस आजयत ३

न्नानि तथा कतकगोमेदकबिसग्रंथिशैवलमूलवस्त्राणि मुक्तामणिश्चेति। पंच विक्षेपणानि भवंति। तद्यथा फलकं त्र्यष्टकं मुंज[illegible]

सिपाडिच्छि ऋतुना पि दकमंचिका शिक्यं चेति सप्त शीतीकराणि भवंति तद्यथा प्रवातस्थापनमुदकप्रक्षेपणं यष्टिकाभ्रामणं व्यजनं वस्त्रोद्धरणं वालुकाप्रक्षे जलकाकृति ५

पणं तेमायः पिंडुसिकतालोष्टानां वाग्निवीपणं प्रसारणं वक्रवेष्टनं नागचंपकोत्पलपाटलापुष्पप्रभृतिभिश्चाधिवासनं निमित्तियापन्नव कृति ६ पाचनमीका

दो डा ५ र्जयेत् सर्वतोयं प्रव्यापन्ना निर्वर्त्तदोषसंजननं पत्रतृणादीनां हितं हितम्। निर्गंधमव्यक्तरसं तृष्णाघ्नं शुचि शीतलं स्वच्छं लघु च हृद्यं च तो सृष्टि ६

श्रीकृष्ण ५ यं गुणवदुच्यते तत्र नद्यः पश्चिमाभिमुखाः पथ्याः लघूदकत्वात्। पूर्वाभिमुखास्तु न प्रशस्यंते। गुरूदकत्वात् दक्षिणा नातिदोषलाः। साधा राम

रणत्वात् तत्र सह्यप्रभवाः कुष्ठं विंध्यप्रभवाः कुष्ठपांडुरोगं मलयप्रभवाः कृमीन् महेंद्रप्रभवाः श्लीपदोदराणि हिमवत्प्रभवाः हृद्रो ८०

अगस्त्यतपोक्षा शिरःपाद श्लीपदं च वेति पारियात्र प्रभवाः पथ्यं नस्ववतपताप नं ४ वलोक ५

जाग्रत् तमात् लोक ५ श्लोक २ उपर ७ आप्रमा ६३ मृद्वश्च उत्तम सियोगः ५

मा. दी. विजा ४ सं. श्रीमा जी २

नामनंएकं ततः भ्रमंदा । ते देवाव निपतितमन्यतररसमुपलभते । स्थानविशेषात् नदीनदसरस्तडागवापीकूपचौंड्यप्र
स्रवणोद्भिदविकिरकेदारपल्वलादिषु च अवस्थितमिति । तत्र लोहितकपिलपांडुनीलपीतशुक्लेष्ववनिप्रदेशेषु मधुराम्ललवणक
टुकतिक्तकषायाणि यथासंख्यमुदकानि भवंतीत्येके भाषंते । तत्तु न सम्यक् । कस्मात् । पृथिव्यादीनामन्योन्यानुप्रवेशात् । ततः सलिल
रसो भवत्युत्कर्षापकर्षेण (कषायश्च) तत्र भूगुणभूयिष्ठायां भूमावम्ललवणं अंबुगुणभूयिष्ठायां मधुरं । तेजोगुणभूयिष्ठायां कटुकं च ।
वायुगुणविशिष्टायां कषायं च आकाशगुणभूयिष्ठायामव्यक्तरसं तमनन्तरीक्षप्रधानं । आंतरिक्षालाभे तस्मेयं । आंतरिक्षं तु चतुर्विधं । धा
रं कारं तौषारं हैममिति । तेषां धारं प्रधानं लघुत्वात् तत्पुनर्द्विविधं गांगं सामुद्रं च । तत्र गांगमाश्वयुजे मासि प्रायो वर्षति देवः । तयोर्द्वपार
पिपरिक्षणं कुर्वीत । शाल्योदनपिंडमकुथितमविदग्धं रजतभाजनोपहितं देवे वर्षति बहिः कुर्वीत सपादिमुहूर्तं स्थितं तस्माद्धृशा एव
भवति तद्गांगं पततीत्येवमंतव्यं । वर्णान्यत्वे सिक्थमपक्लेदवत् सामुद्रमितिविंद्यात् । तन्नोपादेयं सामुद्रमप्याश्वयुजे मासि गृहीतं गांगवद्
वति गांगं पुनः प्रधानेन तदुपाददीत । आश्वयुजे मासि शुचिशुक्लविततपटैकदेशावलंबितमपगाहम्यतलपरिभ्रष्टं अन्यैर्वा शुचिभिर्भाज
नैः गृहीतं सौवर्णे राजते मृन्मये वा पात्रे संस्थापयेत् । तत्सर्वकालमुपयुंजीत । तस्याभावे भौमं तद्वाकाशगुणं वदंति । तत्तु नः
सम्यग्विदं । तथ्याकोपनादेयं सारसताडागप्रास्रवणमौद्भिदं चौड्यमिति । तत्र वर्षास्वांतरिक्षमौद्भिदं वासेवेत । महागुणत्वात् ।
शरदि सर्वमसन्नत्वात् विशेषतः । हेमंते सारसताडागं । वसंते कौपं प्रास्रवणं वा । ग्रीष्मेप्येवं । प्रावृषि चौड्यमनभिवृष्टं सर्व

यनं श्वासकासज्वरहरं पथ्यं सुश्रोदकं तथा। वर्षास्विकटुपाकित्वाद्गुरुकं पित्तलं भवेत्। विपाकमधुरत्वाच्च हेमंते श्लेष्मवर्द्धनं कषायक
टुपाकित्वात ग्रीष्मे वातप्रकोपणं। विद्योषारतिरुक्तत्वात्प्रावृषि वि॥ तप्रकोपणं स्निग्धं स्वादु हिमं हृद्यं दीपनं बस्तिशोधनं। वृष्यं पित्त
पिपासाघ्नं नालिकेरोदकं गुरु। तद्वज्जीर्णं विशेषेण गुरु पित्तकरं स्मृतं। दाहातिसारपित्तास्रमूर्च्छामद्यविषार्तिषु सतत शीतं जलं च्या
स्रतृष्णाछर्दिश्रमेषु च। रोचके प्रतिश्याये प्रसेके श्वयथौ क्षये मंदाग्नावुदरे कुष्ठे ज्वरे नेत्रामये तथा। व्रणे च मधुमेहे च पानीयं मंदमाच
रेत् ते शारदि रोगाम्भोपि चेत्तस्योभि वाल्पशः। समस्थूलरुजा धुक्रम अन्ते तप्तपथमं डुपाः पक्वाष्टमांशेन निर्वर्जितः फेनो निर्मलं ल
घु। वत्तु भीगाद्व शोषन्तु तत्रोर्ध्वं यं शृतं वल्पमतं तत्पाद हीनं वा तद्घ्नं मर्द्धहीनं च पित्तजित्। कफघ्नं पादशेषं तु पानीयं दीपनं तथा। जारपा
नेन विष्टंभि दुर्जरं पवताहृतं स्वतशीतं त्रिदोषघ्नं वाष्पां तत्र्भे वशीतलं। नवपर्युषितं देयं कदाचिन्नहि जानता। अम्लीभूतं कफो
त्क्लेशि नहितं तत्पिपासिते। मद्यपानसमुद्भूते रोगे पित्तोत्थिते तथा सन्निपातसमुद्भूते वस्रतशीतं प्रशस्यते। अजीर्णे घनेवा
रि जीर्णे वारि बलप्रदं। अमृतं भोजने वारि भुक्ते नो परितो निशि। पानीयं प्राणिनां प्राणस्तन्मयं वाखिलं जगत् सात्म्यं लोन्नमयं
ब्रन्तक्षु विदारिवार्यतेः॥ इति जलवर्गः॥ ॥ दाडिमाज्जनं यावो दुं नाविकं मा हिमं वयत्। अश्वा पा श्वेव नामयञ्च करेण लावपुसमः राम
जीर्णज्वरकासशोषगुल्मोन्मादोदरमूर्च्छाभ्रममदपिपासाहृत्पांडुग्रहणीदोषार्शोऽन्त्रवृद्ध्यतिसारप्रवाहिकायोनिरोगान्मेपा ८१
वभ्रम क्लमहरं बल्यं वृष्यं रसायनं वाजीकरणमेव अंसं घालस्यापनं मानुष्यं वमनं विरेचनं वा तुल्यगुणत्वात् ओजसो वर्द्धनमिति
तत्र्थं मेव ह्रिश्रप्राणिनाम भिति वर्द्धनं॥ ~~तस्य च मेवह्नी~~ जातिसात्म्यात् तच्चानेकक्षे श्रद्धीपस्तो.२
रसप्रसादप्रार्द्रस्कुत्॥ मधुरं पिच्छिलं शीतं स्निग्धं स्थिरं सारं मृदु॥ क्षीरं सारं सर्वप्राणिनां तान्तु सात्म्यमिति
सोप्यते तस्त्वव मेव क्षीरं प्राणिना षितिः स्निग्धं मधुरं वि दाहि पान पित्त रोगे न तत्र स्रोतसु विकारे चावरुद्धेः

उजेत्ता उपलब्धितलो देश अवितप: १ मारूपति

कफहृदिति ४

गण्डूषपुनिरोरोगश्लीपदगलगंडातिसाराबोर्वत्याः परीवर्त्ताश्चार्शांसि पारिमात्रप्रभवाः पथ्यावलारोगप्रकराइतिलेघरसीघ्रवहालच्याः
प्रोक्तायाश्चामलाश्चैकाः गुर्व्यः शैवलसंछन्नाकलुषामंदगाश्चयापात्रामोऽन्नघोमरुसुपामतिक्तालवणान्विताः इषत्कषायमधुरालघु
पाकावलेहिताः तत्र सर्वेषामेवं भौमानांग्रहणं प्रत्यूषसि तत्राहिअमलत्वं शैत्यंत्वाधिकंभवति सएवपापरो गुणः इति दिवाकरकिरणैर्दि
निशायामिंदुरश्मिभिः अरूक्षमनभिष्यंदितत्तुल्यंगगनांबुना ॥ गगनांबुत्रिदोषघ्नंगृहीतंयत्सुभाजनेबल्यंरसायनंमेध्यंपात्रापेक्षंततः
परं ॥ रक्तोघ्नंशीतलंह्लादिज्वरदाहविषापहं चंद्रकांतोद्भवंवारिपित्तघ्नंविमलंस्मृतं मूर्छापित्तोष्णदाहेषुविषेरक्तेमदात्ययेभ्रमक्लमपरीतेषु
तमकेवमथौतथा ऊर्ध्वगेरक्तपित्तेचशीतमंभः प्रशस्यते पार्श्वशूलेप्रतिश्यायेवातरोगेगलग्रहे आध्मानेस्तिमितेकोष्ठेसद्यः शुद्धेनवज्वरे
हिक्कायांस्नेहपीतेचशीतांबुपरिवर्जयेत् नारदेयंवादलेरुत्तदीपनंलघुलेखनंनेनवाभिष्यंदिमधुरंसांद्रंगुरुकफापहं तत्काभ्रसारसंबल्यं
कषायंमधुरंलघु ताडागंवातलंस्वादुकषायंकटुपाकिच वातश्लेष्महरंवाप्यंसक्षारंकटुपित्तलं चौंड्यमग्निकरंरूक्षंमधुरंकफकृन्नवापि
फघ्नंदीपनंहृद्यंलघुप्रास्रवणंजिरंसक्षारंपित्तलंकौपंश्लेष्मघ्नंदीपनंलघुमधुरंपित्तशामनमविदाह्योऽजिरंस्मृतं वैकरंलघुसक्षारंश्लेष्म
घ्नंवह्निदीपनंकेदारंमधुरंप्रोक्तंविपाकेगुरुदोषलं तद्वत्पाल्वलमुद्दिष्टंविशेषाद्दोषलंवतत् माहेंद्रंमधुरंकिंचिल्लवणंसर्वदोषकृत्
त्रिभागहीनंपित्तघ्नंतत्त्वेषडंशानिलापहं अर्द्धशेषंकफहरंपादशेषंत्रिदोषजित् अनेकदोषमान्पथ्यंविधिर्भिषग्भिर्दर्शितः एभिर्दोषैरसंयुक्तं
मिश्रोष्णंतुसमंजांगलं पाकेविदाहित्वलोघ्नंप्रशान्तप्रीतिवर्द्धनं दीपनंस्वादुशीतं नयनतोयंसाधारणंलघुकफमेदोनिलापिघ्नंदीपनंवास्तिशो

पाषाण ४

श्वास ४

कारूपा ४

वमनै

तंत्रिदोषघ्नंतत्स्निग्धंविपाकेमधुरंवल्यंसंतर्पणंगुरुवातापहंपवित्रंचदधिगव्यंरुचिप्रदं।आजंकफपित्तलघुवातक्षयापहंदुर्नामश्वा
सकासेषुहितमग्नेश्चदीपनंविपाकेमधुरंरूक्षंवातपित्तप्रसादनं।बलासवर्द्धनंस्निग्धंतेजोनिद्राकरंगुरु।अश्मरीशमनंरूक्षंविशेषाद्
क्षिमाहिषं।विपाकेकटुसक्षारंमस्तुश्लेष्मघौष्ट्रिकंदधि।वातमर्शांसिकुष्ठानिकृमीन्हंत्युदराणिच।रसेपाकेचमधुरंमनभिष्यंदिदोषलं।कोप
नंकफवातानांदुर्नाम्नांचाविकंदधि।दीपनीयमचक्षुष्यंवाडवंदधिवातलं।रूक्षमुष्णंकषायंचकफमूत्रापहंचतत्।कषायानुरसंपाकेगुरुस्निग्धं
वलप्रदं।स्निग्धंविपाकेमधुरंवल्यंसंतर्पणंगुरुचक्षुष्यमग्र्यंदोषघ्नंदधिनार्यागुणोत्तरं।लघुपाकेवलासघ्नंवीर्योष्णंपक्तिवर्द्धनंकषायानुरसं
नागंदधिवर्क्षोविवर्धनं।दधीस्तुकानियानीहगव्यादीनिपृथक्पृथक्विज्ञेयं।तेषुसर्वेषुगव्यमेवगुणोत्तरंवातघ्नंकफकृत्स्निग्धंबृंहणं
नचपित्तकृत्कुर्याद्भक्ताभिलाषंचदधियत्सुपरिस्रुतं।शृतात्क्षीरात्तुयज्जातंगुणवद्दधितत्स्मृतं।वातपित्तहरंरुच्यंधात्वग्निबलवर्द्धनं ॥ १२ ॥
ः सरोगुरुर्वृष्योविज्ञेयोनिलनाशनः।वह्नेर्विनाशनश्चापिकफपित्तविवर्द्धनः।दधिसारंरूक्षंचग्राहिविष्टंभिवातलं।दीपनीयंलघुतरंस
कषायंरुचिप्रदं।शरद्ग्रीष्मवसंतेषुप्रायशोदधिगर्हितं।हेमंतेशिशिरेचैववर्षासुदधिशस्यते।स्रोतोमलहरंमस्तुलघुस्रोतोविशोधनं।अम्लं
कषायमधुरंमृष्यंकफवातानुलोमनं।प्रह्लादनंप्रीणनंचभिनत्त्याशुमलंचयत्।बलमावहतेचापिभक्तच्छंदंकरोतिच ॥ इतिदधिवर्गः ॥ तत
२ क्रंमधुरमम्लंचकषायानुरसंचतत्।उष्णवीर्यंलघुरूक्षंअग्निदीपनंगरशोफातिसारग्रहणीपांडुरोगार्शःप्लीहगुल्मारोचकविषमज्वरतृष्णाछर्दि
सेकशूलमेदश्लेष्मानिलहरंमधुरविपाकंहृद्यंमूत्रकृच्छ्रस्नेहव्यापच्छमनमवृष्यंच।तत्तुनमधुरंश्लेष्मप्रकोपणंपित्तप्रशमनंच।अम्लंवातघ्नं

दधीजल

वालवृद्धक्षतक्षीणानां क्षुद्व्यायामव्यवायकर्षितानां च पथ्यतमं ॥ गोक्षीरमनभिष्यंदि स्निग्धं गुरु रसायनं रक्तपित्तहरं शीतं
मधुरं रसपाकयोः जीवनीयं तथा वातपित्तघ्नं परमं स्मृतं ॥ गव्यतुल्यगुणं त्वाजं विशेषात् शोषिणे हितं दीपनं लघु संग्राहि श्व अजानामल्प
कायत्वात् कटुतिक्तविशेषणात् नात्यम्बुपानात् व्यायामात् सर्वव्याधिहरं पयः ॥ रूक्षोष्णं लवणं किंचित् औष्ट्रं स्वादुरसं लघु ॥ शोफगु
ल्मोदरार्शोघ्नं कृमिकुष्ठविषापहं ॥ आविकं मधुरं स्निग्धं गुरु पित्तकफावहं पथ्यं केवलवातेषु कासे चानिलसंभवे ॥ महाभिष्यंदि म
धुरं माहिषं वह्निनाशनं निकास श्वास पित्तनुत् ॥ नार्यास्तु मधुरं स्तन्यं कषायानुरसं हिमं नस्याश्च्योतने पथ्यं जीवनं लघु दीपनं ॥ हस्ति
न्या मधुरं वृष्यं कषायानुरसं गुरुः ॥ स्निग्धं स्थैर्यकरं शीतं चक्षुष्यं बलवर्द्धनं ॥ पयोऽभिष्यंदि गुर्वामं प्रायशः परिकीर्तितं ॥ तदोक्तं लघुत
रमनभिष्यंदि वै शृतं ॥ वर्जयित्वा स्त्रियास्तन्यमाममेव हि तद्धितं ॥ धारोष्णं गुणवत् क्षीरं विपरीतमतोऽन्यथा ॥ तदेवातिशृतं पक्वं गुरु बृं
हणमुच्यते ॥ अनिष्टगंधमम्लं च विवर्णं विरसं च यत् ॥ वर्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत् ॥ प्रायः प्राभातिकं क्षीरं गुरु विष्टंभि शी
तलं ॥ रात्रौ सोमगुणत्वाच्च व्यायामाभावतस्तथा ॥ दिवाकराभितप्तानां व्यायामानिलसेवनात् ॥ वातानुलोमि श्लेष्मघ्नं चक्षुष्यं चाप
राह्णिके ॥ पित्तकामलाग्निनीनां च गुर्वभिष्यंदि तद्दृशां ॥ च वेष्याव ब्राह्मे दोषान्तं गरीमल्लं समस्तेषु ॥ ॥ इति क्षीरवर्गः ॥ ॥ दधि मधु
रमम्लमथापि चित् ॥ तत्कषायानुरसं स्निग्धं उष्णं पीनसं विषमज्वरातीसारारोचकमूत्रकृच्छ्रकार्श्यापहं वर्णप्राणकरं मंगल्यं च पित्त
श्लेष्माभिवर्द्धनं ॥ गुरु व्यम अनभिष्यंदि मधुरं कफवर्द्धनं कफपित्तकरं रक्तसारम्लं त्वद्बहु बहु सत्वं विदाहि स्याद्विशेषण्मंदजा

हस्थि १
घतर्ल २

कफापहं कषायं वह्निविवृद्धं तिक्तमग्निकरं लघु हंति कारेणवं सर्पिः कफकुष्ठविषक्रिमीन् क्षीरघृतं पुनः संग्राही रक्तपित्तभ्रममूर्छाप्रशा-
मनं नेत्ररोगहितं च सर्पिर्मंडस्तु मधुरः सरो योनिश्रोत्राक्षिशिरःशूलघ्नः नस्यपूरणे शूद्दिश्यते । भवति चात्र पुराणं तिमिरश्वासपीनसज्वरकासनुत्
मूर्छाकुष्ठविषोन्मादग्रहापस्मारनाशनं एकादशशतं चैव वत्सरानवधिकं घृतं रक्षोघ्नं कुंभसर्पिस्यात् परस्तस्तु महाघृतं पेयं महाघृतं भूतैः
आदि तैल कफघ्नं पवनाधिकैः बल्यं पवित्रं मेध्यं च विशेषात्तिमिरापहं सर्वभूतहितं चैव घृतमेतत्प्रशस्यते ॥ इति घृतवर्गः ॥ ॥ तैलं त्वाग्नेयमुष्णं तीक्ष्णं म-
॥९३॥ धुरं मधुरविपाकं बृंहणं प्रीणनं व्यवायि सूक्ष्मं विशदं गुरु सरं विकाशि वृष्यं त्वक्प्रसादनं मेधामार्दवमांसस्थैर्यवर्णबलकरं चक्षुष्यं बद्धमूत्रं
लेखनं तिक्तकषायानुरसं अनिलबलासक्षयकरं क्रिमिघ्नमशितं पित्तजननं योनिशिरःकर्णशूलप्रशमनं गर्भाशयविशोधनं च । तथा छिन्नभिन्न-
विद्धोत्पिष्टच्युतमथितक्षतपिच्चितभग्नस्फुटिताग्निक्षारदग्धविश्लिष्टदारिताभिहतदुर्भग्नमृगव्यालविदष्टप्रभृतिषु च परिषेकाभ्यंगावगाहेषु तिलतै- ॥९३॥
लं प्रशस्यते । तद्बस्तिषु पानेषु नस्ये कर्णाक्षिपूरणे अन्नपानविधौ चापि प्रयोज्यं वातशांतये एरंडतैलं मधुरं तीक्ष्णं दीपनं कटुकषायानु-
रसं सूक्ष्मं स्रोतोविशोधनं त्वच्यं वृष्यं मधुरविपाकं वयःस्थापनं योनिशुक्रविशोधनमारोग्यमेधाकांतिस्मृतिबलकरं वातकफहरं
मधोभागदोषहरं च । वातसीकुसुंभमूलकजीमूतकवृक्षकृतवेधनार्ककंपिल्लकहस्तिकर्णपृथ्वीकापीलुकरंजेंगुदीशिग्रुसर्षपसु-
वर्चलाविडंगज्योतिष्मतीतैलानि तीक्ष्णान्यनिलघ्नानि लघून्युष्णवीर्याणि कटूनि कटुविपाकानि सराणि अनिलकफक्रिमिकुष्ठप्रमेहशिरोरोग- राम
हराणि चेति । वातघ्नं मधुरं तेषु क्षौमं तैलं बलापहं कटुपाकमचक्षुष्यं स्निग्धोष्णं गुरु पित्तलं क्रिमिघ्नं सार्षपं तैलं कंडूकुष्ठापहं लघु कफमे-

सर्षकांत २ तिलो १ देवदारु ३

पित्तकरं चेति। वाते सैंधवयोपेतं स्वादु पित्ते ससर्करं पिबेत कफे वापि व्योषक्षारसमायुतं। तक्रं नोरःक्षते दद्यान्नोष्णकाले न दुर्बले न मूर्छा
भ्रमदाहेषु न रोगे रक्तपैत्तिके। शीतकालेऽग्निमांद्ये च कफामयेषु च। मार्गावरोधे दुष्टे च वायौ तक्रं प्रशस्यते॥ याहिणी वातला रूक्षा तदुर्ज
रा तक्रकूर्चिका तक्रात्सलघुतरो मंडः। कूर्चिका दधितक्रजस्तु रुः किलाटोनिलहा पुंस्त्वनिद्राबलप्रदः मधुरौ वृंहणौ वृष्यौ तद्वत्पीयूषमोरणौ
नवनीतं पुनः सद्यस्कं सुकुमारं लघु सुमधुरं कषायमीषदम्लं शीतलं मेध्यं दीपनं हृद्यं मे ग्राहि पित्तानिलहरं वृष्यमविदाहि दर्पकासव
णार्शोर्दितापहं गुरु वृंहणं शोषघ्नं विशेषतो बालानां प्रशस्यते क्षीरोत्थं पुनर्नवनीतं सुल्लघिष्ठं स्नेहमाधुर्यकृति शीतं सौकुमार्यकरं चक्षुष्यं
संग्राहि रक्तपित्तनेत्ररोगहरं प्रसादनं च संतानिका पुनर्वातघ्नी तर्पणी बल्या स्निग्धा रुच्या मधुरा विपाका रक्तपित्तप्रसादनी गुर्वी च वि केन
एवं च घृषदध्यादि श्रेष्ठो वर्गोभिवर्णितः। विकल्पाभे वशिष्टं च द्वारवीर्यत्समाश्रितो। तत्र घृतं सौम्यं शीतवीर्यं मृदु मधुरं मल्पाभिष्यंदि स्नेहनमु
दावर्त्तोन्मादापस्मारशूलज्वरानाहवातपित्तप्रशमनं मग्निदीपनं स्मृतिमतिमेधाकांतिस्वरलावण्यसौकुमार्यौजस्तेजोबलकरं मायु
ष्यं मेध्यं वयस्थापनं गुरु चक्षुष्यं श्लेष्माभिवर्द्धनं। पाप्मालक्ष्मीप्रशमनं विषहरं रक्षोघ्नं चेति विपाके मधुरं शीतं वातपित्तकफापहं चक्षुष्यम
ग्र्यं बलं गव्यं सर्पिर्गुणोत्तरं आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनं कासे श्वासे क्षये वापि पथ्यं पाके च तल्लघु। मधुरं रक्तपित्तघ्नं गुरु पाके कफा
पहं। वातपित्तप्रशमनं सुशीतं माहिषं स्मृतं। औष्ट्रं कटु घृतं पाके शोफकृमिविषापहं। दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहं। पाके लघ्वल्प
वीर्यं च कषायं कफनाशनं। दीपनं बद्धमूत्रं च विद्याद्वैकशफं घृतं। चक्षुष्यमग्र्यं स्त्रीणां तु सर्पिः स्याद्दमृतोपमं। वृद्धिं करोति देहाग्न्योः लघुपाके

पाके लघ्वाविकं सर्प्पि न च पित्तप्रकोपणं धोजी
कफे निले योनिदोषे शोषे कंपे च तद्धितं इ घृतवार:३

कफघ्ने दोषि जयतिल ... २५

सघृतं वा सा तं तं म्माग्नि

लोहं घृतं रेखुल्वोद

हिक्काश्वासकासातिसारछर्दितृष्णाकृमिविषप्रशमनं ह्लादि त्रिदोषप्रशमनं वा तत्तु लघुत्वात्कफघ्नं पैछिल्यान्माधुर्यात्कषायभावाच्च वा
तपित्तघ्नं रूक्षदीपनलघ्वादिगुणयुक्तं पुराणं नवमेतद्विपरीतं। पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव वा। आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजा
तयः॥ विशेषात्पौत्तिकं तेषु रूक्षोष्णं सविषान्वयात्। वातास्रक्पित्तकृच्छेदि विदाहि मदकृन्मधु। पैछिल्यात्स्वादुभूयस्त्वात् भ्रामरं गुरु संज्ञितं॥
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनं। तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतं। श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः। स्वादुपाकं गुरु हिमं पिच्छिलं
रक्तपित्तजित्। श्वित्रमेहकृमिघ्नं च विद्याद्यात्तुगुणोत्तरं। आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं स्मृतं। कषायं कटुपाकं च बल्यं तिक्तमवातलं। औद्दाल
कं रुचिकरं स्वर्यं कुष्ठविषापहं। कषायमम्लमुष्णं च पित्तकृत्कटुपाकि च। छर्दिमेहप्रशमनं मधुरं तं रूक्षलोड्वं। बृंहणीयं तु नवं नातिश्लेष्महरं सरं मे
दःस्थौल्यापहं ग्राहि पुराणमतिलेखनं। दोषत्रयहरं पक्वमाममम्लं त्रिदोषकृत्। तद्युक्तं विविधैर्योगैर्निहन्यादामयान्बहून्। नानाद्रव्यात्म
कत्वात् योगवाहि परं मधु। तत्तु नानाद्रव्यरसगुणवीर्यविपाकविरुद्धानां पुष्परसानां मक्षिकाभिसंभृतत्वात् उष्णोपचारं उष्णैर्विरुध्यते स ॥२४॥
वंविषान्वयतया मधु। उष्णार्तमुष्णैरुष्णे वा तन्निहंति यथा विषं। तत्सौकुमार्याच्च तथैव शैत्यान्नानौषधीनां रससंभवाच्च। उष्णैर्विरुध्येत विशे
षतश्च तथांतरिक्षेण जलेन वापि। उष्णेन मध्वेकं युक्तं वमनेष्ववचारयेत्। अपाकादनवस्थानान्नात्र विरुध्येत पूर्ववत्। मध्वामात्परतरं आमरा
ध्यं कष्टं न विद्यते। विरुद्धोपक्रमत्वात्तत्सर्वं हंति यथा विषं॥ इति मधुवर्गः॥ इक्षवो मधुरा मधुरविपाका गुरवो शीता स्निग्धा बल्या वृष्या मूत्रला
रक्तपित्तप्रशमनाः कृमिकफकराश्च ते चानेकजातयश्च यथा पौंड्रको भीरुकश्चैव वंशकः श्वेतपोरकः कांतारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः

कंबला२ ३ धीरा ७ ... १

137 3(B)

पित्त ४

137 / 3(B)

दोतिलहरं लेखनं कटु दीपनं । कृमिघ्नमिंगुदीतैलं माषत्रिकंत थालघु । कुष्ठामयकृमिहरं दृष्टिशुक्रबलापहं । विपाके मधुरं तैलं कौ
सुंभं सर्वदोषकृत् । रक्तपित्तहरं शीतं दृणां मबहुषं विदाहि च । किराततिक्तकानिंबकुरकविभीतकनालिकेरक्षोडैलाक्षोडजावंतीप्रिय
ालकर्बुदारस्सर्षपवल्लीत्रपुसैर्वारुर्वकर्कारुकेकूष्मांडप्रभृतीनां तैलानि मधुराणि मधुरपाकानि पित्तप्रशमनानि शीतवीर्याणि अभिष्यंदी
नि सृष्टमूत्राणि श्लेष्मसादनानि वेति मधुककाश्मर्यपलाशतैलानि मधुरकषायाणि तिक्तकफाघ्निप्रशमनानि तुवरकभल्लातकतैले उष्णे म
धुरकषाये तिक्तानुरसे वातकफकुष्ठमेदोमेहकृमिप्रशमने ऊर्ध्वाधोभागदोषहरे च सरलदेवदारुसिंशिपागुरुसारस्नेहः तिक्तकटुकषायाः दु
ष्टव्रणविशोधनाः कृमिकफकुष्ठानिलहराश्च नक्तमालकरंजनीपनिंबद्रवंतीद्रवंतीत्रिफलामासत्मलातिलिकाकंपिल्लशंखिनीस्नेहाः कटुतिक्तकषाया
अधोभागदोषहराः कृमिकफकुष्ठानिलहरा दुष्टव्रणविशोधनाश्च यवतिक्ता तैलं सर्वदोषप्रशमनं मीषत्तिक्तं मध्वग्निदीपनं लेख्यं मेध्यं
मध्यं रसायनं चैरंडेषिका तैलं मधुरमतिशीतं पित्तहरमनिलप्रकोपणं श्लेष्माभिवर्द्धनं च सहकारतैलं मीषत्तिक्तमतिसुगंधि वातक
फहरं रूक्षं मधुरं कषायरसं च ना तिपित्तकरं च फलोद्भवानि तैलानि यान्युक्तानीह कानि चित् । गुणकर्मविविज्ञाय फलानेवं विनिर्दिशेत् ॥
यावंतः स्थावरास्नेहाः समासात्परिकीर्तिताः ॥ सर्वे तैलगुणा ज्ञेयाः सर्वे वा तिलनाशनाः ॥ सर्वेषामिह तैलानां तिलतैलं प्रशस्यते । निष्पत्तेस्तद्गु
स्था१७ णत्वाच्च तैलत्वमितरेषु पि । ग्राम्यानूपौदकानां च वसामेदोमज्जानः गुरूष्णमधुरा वातघ्नाः जांगलैकशफैर्मधुमधुरकषायानुरसे रूक्षं
शीतलमग्निदीपनं बल्यं स्वर्यं लघु सुकुमारं लेखनं हृद्यं वाजीकरणं धानं रोपणं वर्ण्यं प्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहृ

शोधनं १ घोऽ।दि२

कंपाराहीनां ... शीत ... स्तापि ... कफघ्ना ... तैलमेदो मज्जा ... विपाका वातहरा ... तैलवर्गः

शीतल ४ सेतुज ६ ... आ ७